RAGHUVAMSAM.

CANTO III.

WITH THE COMMENTARY OF

MALLINATHA

EDITED WITH

A NEW ANALYTICAL COMMENTARY IN SANSKRIT

AND

MISCELLANEOUS NOTES IN ANGLO-SANSKRIT

BY

SARADARANJAN RAY, M. A.

PROFESSOR OF MATHEMATICS,
METROPOLITAN INSTITUTION, CALCUTTA

Fifth Edition, Improved and Enlarged.

KEDARNATH BOSE, B. A.
28/4, AKHIL MISTRY'S LANE, CALCUTTA.
1903.

PRINTED BY
SARVESHWAR BHATTACHARYYA, AT THE BUCKLAND PRESS,
59 MIRZAPUR STREET, CALCUTTA.

तृतीयः सर्गः ।

अथ रघोर्जन्म ।

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम् ।
निदानमिक्ष्वाकुकुलस्य सन्ततेः सुदक्षिणा दौर्हृदलक्षणं दधौ ॥१॥

Anvayabodhini.—कविः कविगुरुः स्वयं, रविकुलान्वया भारती,
ऋतुः शततमक्रमा, नृपगिरीशनन्दियोजकः,
रघुसुतवरक्षिता, प्रतिभटः सुराणां पतिः,
स नो भवतु कर्मसु व्यतिकरः शुभः शर्मदे ।

'अथ सुदक्षिणा दौर्हृदलक्षणं दधौ' [अनन्तरं सुदक्षिणा गर्भचिह्नं धारयामास]। किम्भूतं दौर्हृदलक्षणं दधौ ?—'उपस्थितोदयं भर्तुः ईप्सितम्' [विलम्बितफलेन येन मनोरथेन स नृपतिः कालं निनाय, फलितप्राय तमेव अथ राज्ञी धारयामास]। पुनः किम्भूतम् ?—'सखीजनोद्वीक्षणकौमुदीमुखम्' [निशि तमसि प्रसर्पति हि जनाः कौतुकेन चन्द्रोदयम् अपेक्षन्ते ; अनपत्यतारूपे तमसि तत् राजकुलम् आच्छन्नं सति, सखीनां नेत्राणां सन्दर्भे सा राज्ञी ज्योत्स्नारम्भमिव गर्भलक्षणरूपेण धारयामास]। पुनरपि किम्भूतम् ?—'इक्ष्वाकुकुलस्य सन्ततेः निदानम्' [दिलीपस्य अन्ते इक्ष्वाकुकुलस्य उच्छेद एव अभविष्यत् यदि राज्ञी न गर्भं नाधारयिष्यत् ; इत्थम् इक्ष्वाकुकुलस्य अनुच्छेदस्य कारणं दौर्हृदलक्षणं सा दधौ]।

Or thus.—'अथ सुदक्षिणा उपस्थितोदयं भर्तुः ईप्सितं दधौ' [अनन्तरं स्वामिनो दिलीपस्य प्राक्काले मनोरथविषयीभूतमेव वस्तु सा सुदक्षिणा धारयामास]। किं तत् वस्तु यत् सा दधौ ?—'सखीजनोद्वीक्षणकौमुदीमुखम् (दधौ)' [सखीनां नेत्राणां सन्दर्भे अभिरामं ज्योत्स्नाप्रादुर्भावस्वरूपं वस्तु सा दधौ]। तदपि पुनः किम् ?—'इक्ष्वाकुकुलस्य सन्ततेः निदानम् (दधौ)' [इक्ष्वाकुकुलस्य अनुच्छेदस्य बीजभूतं वस्तु सा दधौ]। नैतदेकमपि यदा बुध्यते, स्फुटं कथय किं वस्तु सा दधौ—'दौर्हृदलक्षणं (वस्तु दधौ)' ["दौर्हृदम्" इति यत् कथ्यते तदेव सा दधौ]।

Prose order.—अथ (अनन्तरं) सुदक्षिणा उपस्थितोदयं (प्राक्काले) भर्तुः (स्वामिनः) ईप्सितं (मनोरथं) सखीजनोद्वीक्षणकौमुदीमुखं (वयस्यजनलोचनचन्द्रिकोदयं) इक्ष्वाकुकुलस्य (इक्ष्वाकुवंशस्य) सन्ततेः (अविच्छेदस्य) निदानं (बीजं) दौर्हृद

अलञ्चयत । The voice may be changed thus—असमग्रभूषणां तां (सुदक्षिणाम्)...विचेयतारकां प्रभातकल्पां शर्वरीम्...इव अलञ्चयन् (जनाः) ।

तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ॥३॥

N. B. The S'loka is obscene ; we therefore suppose the *Anvayabodhini* and the Translations.

Prose order.—क्षितीश्वरः रहसि (शुचिव्यपाये) मृत्सुरभि तदाननम् उपाघ्राय करी शुचिव्यपाये पयोमुचां पृषतैः सिक्तं वनराजिपल्वलम् (उपाघ्राय इव) तृप्तिं न आययौ । *Mallinátha* does not give the prose order.

Sanjivani.—तदिति । 'क्षितीश्वरः रहसि मृत्सुरभि' मृदा सुगन्धि तस्याः आननं 'तदाननं' सुदक्षिणामुखम् 'उपाघ्राय तृप्तिं न आययौ' । कः कमिव ? 'शुचिव्यपाये' ग्रीष्मावसाने ["शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहेऽपि स्यादुपधाशुद्धमन्त्रिणि ॥" इति विश्वः] 'पयोमुचां' मेघानां 'पृषतैः' बिन्दुभिः ["पृषन्ति बिन्दुपृषताः" इत्यमरः] 'सिक्तम्' उक्षितं 'वनराज्याः पल्वलम्' उपाघ्राय 'करी' गजः 'इव' । [अत्र करिवनराजिपल्वलानां कान्तकामिनीवदनसमाधिरनुसन्धेयः गर्भिणीनां मृद्भक्षणं लोकप्रसिद्धमिव । एतेन दौहृदाख्यं गर्भलक्षणमुच्यते] ॥ ३ ॥

Miscellaneous Notes.

1. तदाननम्—तस्याः आननं तदाननं, तत् ; accusative of उपाघ्राय ।

2. मृत्सुरभि—See *Sanjivani* सुप्सुपेति समासः ; the तृतीया in मृदा is हेतौ—This applies to both तदाननम् and वनराजिपल्वलम् both being scented *because of* earth. Some women, when with child like to chew burnt cakes of earth. The little water *collected at the bottom of the dried up pools, as well as the* whole pool itself, during the first showers of rain after summer, invariably has an earthly fragrance.

3. क्षितीश्वरः—क्षितेः पृथिव्याः ईश्वरः अधिपतिः क्षितीश्वरः ।

4. रहसि—Has a double sense. In private, also, in sequestered parts of the forest where there is no danger of being disturbed by hunters.

5. उपाघ्राय—घ्राणेन गृहीत्वा Having scented.

6. तृप्तिं न आययौ—Did not attain satiety. Never thought he had enough. Elephants do wallow in the mud for hours and hours together.

7. पृषतैः—[illegible] ([illegible]) = [illegible] ([illegible]) ।

8. पयोमुचाम्—मेघानां । पयः मुञ्चन्ति इति पयस् + मुच् + क्विप् कर्तरि = पयोमुचः मेघाः ; तेषाम् ।

9. शुचिव्यपाये—Has a double sense.

10 वनराजिपल्वलम्—वनस्य राजिः श्रेणी वनराजिः ; वनराज्याः पल्वलं वनराजिपल्वलम् [illegible] ; or वनराजिषु पल्वलं वनराजिपल्वलं शाकपार्थिवादिवत् [illegible] : [illegible] Accusative of उपाघ्राय understood.

11 *Change of voice.*—...क्षितीश्वरेण...करिणा... तृप्तिः न आयये ।

दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः ।
अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान् विलङ्घ्य सा ॥४

Anvayabodhini.—[illegible] ?—'सा अन्यरसान् विलङ्घ्य प्रथमं तथाविधे अभिलाषे मनः बबन्ध' [[illegible]]। [illegible] ?—'हि तत्सुतः भुवं भोक्ष्यते अतः' [[illegible]]। [illegible]—'दिगन्तविश्रान्तरथः (सन् तत्सुतः भुवं भोक्ष्यते)' [[illegible]]। [illegible] तत्सुतः भुवं भोक्ष्यते ?—'मरुत्वान् दिवम् इव' [[illegible]]।

Prose order.—हि (यतः) दिगन्तविश्रान्तरथः (अनिरुद्धरथगतिः सन्) तत्सुतः (तस्याः सुतः) मरुत्वान् (इन्द्रः) दिवं (स्वर्गम्) इव भुवं (पृथिवीं) भोक्ष्यते ([illegible]) अतः (अस्मात्) प्रथमम् (आदौ) सा तथाविधे (तादृशे) अभिलाषे ([illegible]) अन्यरसान् (इतराभिलाषान्) विलङ्घ्य ([illegible]) मनः (चेतः) बबन्ध ([illegible]).

Sanjivani.—दोहदलक्षणे प्रकारे हेतुमुत्प्रेक्षते, दिवमिति ।

[illegible] ॥ ५ ॥

[illegible]

She, passing over other enjoyables, set her mind first upon a desire like that, because her son, with his car halting at the ends of the quarters, shall enjoy the earth like Indra (enjoying) the heaven. (1).

Miscellaneous Notes.

1. मरुत्वान्—मरुतो देवाः सन्ति अस्य अनुचरत्वेन इति मरुत्+मतुप् = मरुत्वान् इन्द्रः। 'मरुद्देवे समीरे ना पंसिवर्ण मांसकन्' इति मेदिनी ; 'मरुतो पवमानौ' इत्यमरः।

2. भोक्ष्यत—Shall enjoy अनुभविष्यति ; third person sing. लट् of भुज to enjoy [Conj. I. 67]।

3. दिगन्तविश्रान्तरथः—दिशाम् अन्ताः शेषः दिगन्ताः ; दिगन्ते विश्रान्तः गमनाद्विरतः दिगन्तविश्रान्तः ; दिगन्तविश्रान्तो रथो यस्य, सः। Qualifies तत्सुतः। The word विश्रान्त is derived वि+श्रम्+क्त कर्त्तरि। Now वि+श्रम् means 'to rest,' *i. e.* 'to relieve fatigue' and also simply 'to cease to move.' Here it has the latter sense. Both senses are of frequent use. Compare in the 1st sense—

'अथ यन्तारमादिश्य धुर्य्यान् विश्रामयेति सः'—I. 54.

'विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः'—IV. 74,

and in the 2nd sense,

'आस्यत्रविच्छितचच्छिना कथमहो नाद्यापि विश्राम्यति'—Bhavabhûti.

'विरोधी विश्रान्तः प्रसरति रसो निर्वृतिघनः'—Ibid.

भुज takes आत्मनेपद when it does not mean 'to protect.

स्वप्नादावनुकम्' इति विश्वः ; in this quotation स्वप्नादौ, refers to the *Sútra* 'स्वप्नेऽलम्बुतान्दामभावनीप्सासु प्रतिपर्यनवः । Thus अनु has the meaning of वीप्सा *i. e.* repitition.

12. आहृतः—आ + हृ + क्त कर्मणि = आहृतः आदरः । Qualifies उत्तरकोशलेश्वरः ।

13. प्रियसखी:—प्रियायाः सख्यः प्रियासख्यः ; ताः । Accusative (अप्रधानकर्म) of पृच्छति as which is द्विकर्मक ।

14. उत्तरकोशलेश्वरः—कोशलानां निवासो जनपदः कोशलाः the affix अण् disappearing by the rule 'जनपदे लुप्' । Again the word कोशल, though the meaning a *single* kingdom, is in the plural. by the rule 'लुपि युक्तवत् व्यक्तिवचने'—when disappearance of an affix is enjoined by the word लुप्, it is to be understood that the *gender* and *number*, of the word derived, are to be the same as those of the stem. Hence कोशलानाम् indicating a plural idea, we get कोशलाः जनपदः and not कोशल. जनपदः ! उत्तरकोशला. अयोध्या नित्यसमासः by the rule 'दिक्संख्ये संज्ञायाम्—words meaning the points of the compass and the numerals are compounded in a तत्पुरुष *only* when the compound is a proper name. The compound उत्तरकोशल being a संज्ञा has no विग्रहवाक्य । 'नहि वाक्येन संज्ञा गम्यते'—Vámana. उत्तरकोशलानाम् ईश्वरः उत्तरकोशलेश्वरः दिलीपः ।

15. *Change of voice.*—...आहृतेन (सता) प्रियासख्यः उत्तरकोशलेश्वरेण पृच्छन्ते स्म । The portion under quotation is not changed owing to the presence of इति ; even without इति as the अप्रधानकर्म of verbs of the दुहादि class becomes उक्त in the कर्मवाच्य, we must not change that portion.

उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतम् ।
न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ॥६॥

Anvayabodhini.—भवतु पृच्छति स्म, ताभिः पुनः किञ्चित् आवेदितं किमभूत ?—'यत् एव सा वव्रे, तत् (एव) आहृतम् अपश्यत्' (यदेव तया सखीमुखेन याचितं, तदेव राज्ञा उपनीतम्) । अथ कथं सा उक्तरीत्या एवं यदृच्छया

Miscellaneous Notes.

1. उपेत्य—Having attained. उप + इ + ल्यप् ।

2. दौहृददुःखशीलताम्—दुःखयति इति दुःखकरं पचाद्यच् ; दुःखं शीलं स्वभावो यस्य तत् दुःखशीलम् ; दुःखशीलस्य भावः दुःखशीलता in which दुःखशीलम् is the neuter, by the principle 'सामान्ये नपुंसकम्' ; दौहृदेन दुःखशीलता दौहृददुःखशीलता, तृतीयेति समासः ; ताम् Accusative of उपेत्य।

Q. Discuss the exposition दौहृदेन दुःखशीला दौहृददुःखशीला ; तस्या भावः, दौहृददुःखशीलता, ताम् । *Ans.* This will give the compound दौहृददुःखशीलताम् : the *Várttika* "त्वतलोर्गुणवचनस्य' will not apply, and we shall not have पुंवद्भाव so as to obtain the compound दौहृददुःखशीलताम् Náges'a Bhatta remarks on the *Várttika* 'अत्र गुणशब्दः जाति द्रव्य-क्रियाशब्द-भिन्नपरः संज्ञा-अस्त्रीलिङ्गातिरिक्तः शब्दो गुणवचनशब्देन उच्यते'। Nor does the principle 'सामान्ये नपुंसकम्' apply for as soon as we connect दौहृद with दुःखशील the compound loses its *general character* (सामान्यत्व) and indicates स्त्रीत्व ।

3. एव—I think एव is better taken with यत् so as to give it an indefinite character. *Mallináthá* however takes it with अपश्यत् ।

4. वव्रे—प्रार्थयामास Demanded. वृ – लिट् ए [conj. II. 63]. Also compare *Kavirahasyam*—

"यो नीराति कदाचित् रघुवरे धनं ददातीश्वरे
तेनोभिर्वनदाह्यदोषि वरति ध्यातीन् ददार्हैर्धनैः ।
सुक्षीरिवि इवाति यो वरयति येनं यशो व्रीयते
दुष्टं वारयति द्विषो निवरने नित्यं प्रियोपद्रवम् ॥"

5. आहृतम्—आनीतम् brought to her. आ + हृ + क्त कर्मणि = आहृतम्, तत् । Qualifies तत् ।

6. इष्टम्—इष् + क्त कर्मणि = इष्टम् अभिलषितं वस्तु ।

7. त्रिदिवं—The derivations of त्रिदिव as usually given, all assume some irregularity as वर्णान्तरत्व or गुणाभाव &c. The following is free of such assumptions—'ब्राह्म-वैष्णव-रौद्रभेदेन सात्त्विक-राजस-तामसभेदेन वा त्रिविधो दीव्यति व्यवहरति प्रकाशते वा' इति त्रि + दिव् + क कर्तरि by the rule 'इगुपधज्ञाप्रीकिरः कः'। त्रिदिवम् in the neuter is also correct ; thus त्रिदिवं तु खे । स्वर्गे त्रिदिवा नद्याम्' इति हैमः ।

8. अपि—सम्भावनायाम् । Even, in Heaven, not to say of the earth.

9. भूपतेः—भुवः पतिः भूपतिः, तस्य । This seems to imply that even though he was lord of the earth only, and therefore had command over earthly things alone, yet, such was his prowess, that when he demanded a thing of even the gods in Heaven, they dared not refuse him.

10. अनासाद्यम्—न आसाद्यं प्राप्यम् इति नञ् + आ + सद + णिच् + ण्यत् = अनासाद्यम् inaccessable. Qualifies इष्टम् ।

11. अधिज्यधन्वनः—See note on अधिज्यधन्वा II. 8. आरोपितमौर्वीकस्य—Of him with a full-strung bow. Qualifies भूपतेः ।

12. *Change of voice.*—...तया...अदृश्यत...इष्टेन अनासाद्येन न अभावि ।

क्रमेण निस्तीर्य्य च दोहदव्यथां प्रचीयमानावयवा रराज सा।
पुराणपत्रापगमादनन्तरं लतेव सन्नद्धमनोज्ञपल्लवा ॥ ७ ॥

Anvayabodhini.—अथ निवृत्ते दोहदे किम्भूत ?—'सा लता इव रराज' [यथा लता शोभते, साऽपि तथैव शुशुभे] किम्भूता लता ?—'सन्नद्धमनोज्ञपल्लवा' [मनोहरैः नूतनैः पत्रैः शोभिता लता इव सा शुशुभे]। कदा पुनः पल्लवोद्गमः ?—'पुराणपत्रापगमात् अनन्तरम्' पुरातनानां पत्राणां पतनात् परं नवपल्लवोद्गमे सति यथा लता शोभते तथा]। सा तु पुनः कथं तथाविधया लतया सह तुल्यं शुशुभे ?—'क्रमेण दोहदव्यथां च निस्तीर्य्य प्रचीयमानावयवा (सती)' क्रमेण दोहदजनिता पीड़ा तस्या विगता, अङ्गानि च पुष्टिं गन्तुमारब्धानि ; इत्थं पुष्यमाणावयवा सा तथाविधा लता इव रेजे]।

Prose order.—सा क्रमेण (क्रमशः) दोहदव्यथां (गर्भलालसपीड़ां) च निस्तीर्य्य (अतिक्रम्य) प्रचीयमानावयवा (पुष्यमाणाङ्गी सती) पुराणपत्रापगमात् (पुरातनपल्लवपातात्) अनन्तरं (परं) सन्नद्धमनोज्ञपल्लवा (जातमनोहरपत्रा) लता (वल्ली) इव रराज (शुशुभे)।

Sanjivani.—क्रमेणेति। 'सा' सुदक्षिणा 'क्रमेण दोहदव्यथाञ्च निस्तीर्य्य प्रचीयमानावयवा' पुष्यमाणावयवा सती 'पुराणपत्राणाम् अपगमात्' नाशात् 'अनन्तरं सन्नद्धाः' सञ्जाताः प्रत्यग्रत्वात् 'मनोज्ञाः पल्लवाः' यस्याः सा 'लता इव रराज' ॥ ७ ॥

क्रमে দোহদজনিত ক্লেশ অতিক্রম করিয়া পুষ্টাঙ্গ হইয়া, তিনি, পুরাতন পত্রের অপগমে

মনোহর (নূতন) পত্রের উদ্গম হইলে লতা যেরূপ শোভা পায়, সেইরূপ শোভা প্রাপ্ত হইলেন ॥ ৭ ॥

Having got over the distress of the longings of pregnancy, with her limbs getting plump, she shone like a creeper with an array of lovely leaves after the disappearance of the old ones. (7).

Miscellaneous Notes.

1. क्रमेण—इत्थं तृतीया seems better than प्रकृत्यादिभ्यस्तृतीया—See note on क्रमेण II. 24.

2. निस्तीर्य—निस्+तॄ+ल्यप्। अतिक्रम्य Having got over.

3. च—पक्षान्तरे। The reference is to the previous Sloka. सा दौहृददुःखशीलताम् उपेत्य क्षीणा अभूत, किन्तु दोहदव्यथां निस्तीर्य पुष्यमाणावयवा सती रेजे। 'चान्वाचये समाहारेऽन्योन्यार्थेसमुच्चये। पक्षान्तरे तथा पादपूरणेऽप्यवधारणे' इति मेदिनी।

4. दौहृदव्यथाम्—दौहृदस्य व्यथा or दौहृदेन व्यथा दौहृदव्यथा,षष्ठीसमासः or सहसुपेति समास.; ताम्। Accusative of निस्तीर्य।

5. प्रचीयमानावयवा—With limbs getting plump प्र+चि+शानच् कर्म्मणि=प्रचीयमाना.; प्रचीयमानाः अवयवाः यस्याः सा। Qualifies सा which refers to सुदक्षिणा।

6. रराज—Shone; अशोभत। राज+लिट् अ [conj. II. 20].

7. पुराणपत्रापगमात्—After the disappearance of the old leaves; पुरा भवम् इति पुरा+ट्युल्=पुरातनम्, पुराणम्, the second form being obtained irregularly ['पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' इति सूत्रे निपातनात्]; पुराणानि पत्राणि पुराणपत्राणि; पुराणपत्राणाम् अपगमः पतनं पुराणपत्रापगमः; तस्मात्; 'अनन्तरम्' इति अन्तिकार्थशब्दयोगात् पञ्चमी by the rule 'दूरान्तिकार्थैः षष्ठी अन्यतरस्याम्'—Words having the sense of *for* and *near* govern optionally the fifth and sixth cases. See note 8.

8. अनन्तरम्—अविद्यमानम् अन्तरम् अवकाशः दूरता यस्मिन्; तत् यथा तथा, क्रियाविशेषणम् adverb qualifying the क्रिया in रराज। The words अनन्तर indicates *nearness* in point of *time* and *place*. Here the nearness is in point of *time*. For nearness in point of *place*, com-

pare 'नरेन्द्रमार्गाट्ट इव प्रपेदे—III. 36. 'अनन्तराशीर्वचनाद्यवार्ये भर्तोर्गृहे प्रतिपद्यते।'—VII. 21.

9. मनोज्ञमनोज्ञपत्त्रया—मनोज्ञाः मनोहराः पत्त्राः पत्राणि मनोज्ञपत्त्राः; सम्यक् जाताः मनोज्ञपत्त्राः यस्याः, सा। (Qualifies लता)

10. *Change of voice.*—लता. मनोज्ञमानामनसा (लता)...मनोज्ञपत्त्रया लतया...रेजे।

दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम्।
तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियम्॥८॥

Anvayabodhini.—ततः किम्?—'नितान्तपीवरं तदीयं स्तनद्वयं सुजातयोः पङ्कजकोशयोः श्रियं तिरश्चकार' [अतिस्थूलं तस्याः स्तनद्वयं, सुन्दरयोः कमलकोरकयोः शोभाम् अतीत्य तस्थौ]। किंभूतम् अहःसु प्रथमाकल्पेन जातम्?—'दिनेषु गच्छत्सु' [काले गच्छति सति एवमभूत्, न तु तत्क्षणमेव]। किंभूतयोः पङ्कजकोशयोः?—'भ्रमराभिलीनयोः' [भ्रमरैः अभिव्याप्तयोः कमलकोरकयोः श्रियमतीत्य तस्थौ]। किंभूतं स्तनद्वयं तथाविधयोः पङ्कजकोशयोः सदृशं भवितुमर्हति?—'आनीलमुखम्' [गर्भधारणाद्धेतोः स्तनौ कृष्णमुखौ जातौ, अतस्तस्याः तत् स्तनद्वयं भ्रमरैर्व्याप्तयोः कमलकोरकयोः शोभाम् अधश्चकार]।

Prose order.—दिनेषु गच्छत्सु नितान्तपीवरम् आनीलमुखं तदीयं स्तनद्वयं भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियं तिरश्चकार।

Sanjivani.—लक्षणान्तरं वर्णयति, दिनेष्विति। 'दिनेषु' दौहृददिवसेषु 'गच्छत्सु नितान्तपीवरम्' अतिस्थूलम् 'आ' समन्तात् 'नीलं मुखं' चूचुके यस्य तत् 'तदीयं स्तनद्वयं भ्रमरैः अभिलीनयोः' अभिव्याप्तयोः 'सुजातयोः' सुन्दरयोः 'पङ्कजकोशयोः' पद्ममुकुलयोः 'श्रियं तिरश्चकार' [अत वाग्भटः, "अम्लेष्टता स्तनौ पीनौ श्वेतान्तौ कृष्णचूचुकौ" इति]॥ ८॥

দিনে দিনে, তাঁহার অতিস্থূল স্তনদ্বয়ের চূচুক কৃষ্ণবর্ণ হইল; (তখন তাহারা) ভ্রমর কর্তৃক অভিব্যাপ্ত পরিপুষ্ট কমলকোরকদ্বয়ের শোভাকে পরাস্ত করিল॥৮॥

As days passed, her two bosoms, exceedingly plump, their teats blue all round, surpassed the loveliness of a couple of well-develop-ed lotus-buds, with black-bees reclining on them. (8).

Miscellaneous Notes.

1. दिनेषु—भावे सप्तमी। *Mallinátha* supposes this to refer to

the days of peculiar lodgings—दोहददिवसेषु। It may also be supposed to have been used in a general sense—*as time went on.*

2. गच्छत्सु—Seventh case singular of गच्छत्। गम+शतृ=गच्छत् passing. अतिक्रामत्सु। Qualifies दिनेषु।

3. नितान्तपीवरम्—नितान्तं पीवरं नितान्तपीवरम् very plump, सुप्सुपेति समासः। Qualifies स्तनद्वयम्।

4. आनीलचूचुकम्—आ समन्तात् नीले आनीले [1st case dual]; आनीले चुचुके यस्य, तत्। कृष्णचूचुकम्। Qualifies स्तनद्वयम्।

5. स्तनद्वयम्—द्वौ अवयवौ अस्य इति द्वि+तय=द्वि+अयच्=द्वयम्। स्तनयोः द्वयम् स्तनद्वयम्। षष्ठीतत्पुरुषः।

6. तिरश्चकार—तिरस्+कृ+लिट् अ *Lit.* Hid. अधश्चक्रे। When something is hidden, that which hides is seen, and the thing hidden is not seen and not noticed. Hence, secondarily that which is *not noticed* is तिरस्कृत, even though it is visible; it is made तिरस्कृत by the thing *owing to which it is not noticed.* Thus when a thing, owing to its possessing some excellence which a second thing has not, draws attention to itself and diverts it from the second, the second is said to be hidden—'तिरस्कृत'। Here, lotuses studded with black bees are no doubt beautiful, but *Sudakshiná's* breasts, with their teats blackened, looked still more beautiful; hence the beauty of the lotuses was *hid* 'तिरस्कृत' as it were by that of her breasts.

7. भ्रमराभिलीनयोः—लग्नद्विरेफयोः। अभि+ली (श्लेषणे)+क्त कर्मणि= अभिलीनौ आश्लिष्टौ or अभिव्याप्तौ as *Mallinátha* has it. ली is here सकर्मक। The root is generally used as अकर्मक; compare—'शमीमिवाभ्यन्तरलीनपावकाम्'—Sl. 9; 'निर्घातोग्रैः कुञ्जलीनान् जिघांसुः'—*Kalidása*; 'लीनं दिवाभीतमिवान्धकारम्'—*Ibid.* 'पुष्पैः सरोजैरिव निर्लीनभृङ्गैः' *Bhatti.*; 'न पङ्कजं तत् यदलीनषट्पदम्'—*Ibid.* For सकर्मक use, compare 'लिनाति शाखां लावकम्'—*Durgádasa,* quoted by *Westergard*; 'यदा निलयनाददिर्निलीनानि मृगद्विजैः'।—*Rámáyana.*

8. सुजातयोः—सु सुष्ठु जातौ प्रवृद्धौ सुजातौ well-developed सुप्सुपेति-समासः; तयोः। सुन्दरयोः प्रवृद्धयोर्वा। Qualifies पङ्कजकोशयोः।

व्यधत्त' [ततः स राजा पुंसवनसीमन्तोन्नयनप्रभृतीन् शास्त्रीयान् क्रियाकलापान् यथोक्ते काले सम्पादयामास]। ताः क्रियाः संक्षेपतो बाहुल्येन वा सम्पादयामास?—'प्रियानुरागस्य सदृशीः (क्रियाः व्यधत्त)' [यावान् सुदक्षिणायां तस्य अनुराग आसीत् तदनुरूपाः एव क्रिया अनुष्ठिताः]। सत्यपि अनुरागे, अनुन्नतं चेत मनः, क्रियासु मतिर्न प्रवर्त्तते, तत् ब्रूहि कीदृशीः क्रिया व्यधत्त—'मनःसमुन्नतेः (सदृशीः क्रियाः व्यधत्त)' [समुन्नतमेव तस्य मन आसीत्, तथाविधस्य मनसः अनुरूपाः क्रियास्तेन विहिताः]। तर्हि प्रभूतं तत्र वित्तमावश्यकम्; तत् पुनः कुतो लब्धम्?—'दिगन्तसम्पदां च (सदृशीः क्रिया व्यधत्त)' [सत्यं महान् हि तस्य सुदक्षिणायामनुराग आसीत्, मनश्च अत्युन्नतमेव; अनयोरनुरूपाः क्रियाः अपि बहुवित्तसाध्याः स तु पुनः दिगन्तं यावत् यत् वित्तं प्रविश्य लब्धं, तत् सर्वं तासु क्रियासु नियोजयामास, अतः सुसम्पन्ना एव ता जाताः]। किमेतत् वित्तं याञ्चया लब्धम्?—'भुजार्जितानाम् (दिगन्तसम्पदां सदृशीः)' [निर्जितराजन्यकः सः भुजबलेन सर्वं तत् वित्तमर्ज्जयामास]। सर्वमेतत् धैर्य्यमपेक्षते—'धीरः (सः) धृतेः च (सदृशीः क्रिया व्यधत्त)' [धीरस्य तस्य धृतिरपि महती आसीत्; तदेवं सर्वोपकरणसद्भावात् सुसम्पन्ना एव ताः क्रिया बभूवुः]।

Prose order.—धीरः सः प्रियानुरागस्य मनः समुन्नतेः भुजार्जितानां दिगन्तसम्पदां च धृतेः च सदृशीः पुंसवनादिकाः क्रियाः यथाक्रमं व्यधत्त।

Sanjivani.—प्रियेति। 'धीरः सः' राजा 'प्रियायाम् अनुरागस्य' स्नेहस्य 'मनसः समुन्नतेः' औदार्यस्य 'भुजेन' भुजबलेन करेण वा 'अर्जितानां', न तु पित्र्यादिना, 'दिगन्तेषु सम्पदां', 'धृतेः' पुत्रो मे भविष्यतीति सन्तोषस्य 'च' ["धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु" इति विश्वः] 'सदृशीः' अनुरूपाः पुमान् सूयते अनेनेति 'पुंसवनं' तत् 'आदिः' यासां ताः 'क्रियाः' 'यथाक्रमं' क्रममनतिक्रम्य 'व्यधत्त' कृतवान् [आदिशब्देन अनवलोभनसीमन्तोन्नयने गृह्येते। अत्र तानि द्वितीये तृतीये वा पुंसवनं, यदाह—"पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्" इति पारस्करः। "चतुर्थेऽनवलोभनम्" इति आश्वलायनः। "षष्ठेऽष्टमे वा सीमन्तः" इति याज्ञवल्क्यः] ॥ १० ॥

সেই ধীর রাজা যথাক্রমে পুংসবন প্রভৃতি ক্রিয়াকলাপ, প্রিয়ার প্রতি (প্রগাঢ়) অনুরাগের, ধীর (মনের) উদারতার ও (অপার) আনন্দের, এবং বাহুবলে দিগন্ত হইতে অর্জিত (প্রভূত) সম্পদের অনুরূপ ভাবে সম্পন্ন করিলেন ৷ ১০ ৷

Calm and steady, he performed, in order, the ceremonies beginning with Pumsavana, in a manner worthy of his affection to his beloved (queen), of his loftiness of mind, of the riches acquired by his arms from the ends of the quarters, and of his joy. (10).

not implying *seeing*, if preceded by समान and ... by the rule 'दृग्दृशवतुषु'—समान becomes स when दृश ... follow = सदृश्यः स्त्रियाम् ; ताः । अनुरूपाः । Qualifies ... हि दृशिशब्द प्रकाशः नैवात्र दर्शनक्रिया विद्यते'।

10. व्यधत्त—विदधे performed वि + धा + लङ् ...

11. *Change of voice.*—...धीरैण तेन...सदृशः ...

सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया गृहागतः।
तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्लवनेत्रया नृपः॥

Anvayabodhini.—'गृहागतः नृपः तया ननन्द' [...] अनुष्ठाय गृहं प्रत्यागतः स राजा तथाविधां तां दृष्ट्वा आनन्दितोऽभूत्। ... तया स आनन्दं लेभे?—'पारिप्लवनेत्रया' [चञ्चललोचनया तया] ... तु सदैव स तस्याः प्रकृतिः, अन्यो तत् तस्य आनन्दहेतुः ; तदुक्तिं ... तया स ननन्द—'सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया' [... मात्राभिः अनुप्रविष्टः स गर्भः अधुना प्रसवसमये अतीव गुरुभारो ... गते भर्त्तरि आचारात् सम्माननार्थम् आसनात् उत्थातुकामाया तस्याः ... दृष्ट्वा, आसन्नप्रसवेयम् इति स राजा मेने, तुतुषे च]। ... किम्भूतया स ननन्द—'उपचाराञ्जलिखिन्नहस्तया' [आगमनात् ... पूजार्थम् अञ्जलिं बद्धम्, तदा तु दौर्बल्यात् हस्तौ तस्याः शिथिलौ ... प्रसवस्य अत्यासन्नतां सूचयित्वा तम् आनन्दयामास]।

Prose order.—गृहागतः नृपः, सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया, उपचाराञ्जलिखिन्नहस्तया, पारिप्लवनेत्रया तया ननन्द।

Sanjivani.—सुरेन्द्रमात्रेति। 'गृहागतः नृपः सुरेन्द्राणां' ... 'मात्राभिः' अंशैः 'आश्रितस्य' अनुप्रविष्टस्य 'गर्भस्य गौरवात्' ... आसनादुत्थितया इत्यर्थः। 'उपचारस्य अञ्जलौ' अञ्जलिकरणे 'खिन्नहस्तया' ... 'पारिप्लवनेत्रया' तरलाक्ष्या ["चञ्चलं तरलं चैव पारिप्लवपरिप्लवे" इत्यमरः।] ... स्त्रियाः 'ननन्द' [सुरेन्द्रमात्राश्रितेत्यत्र मनुः—"अष्टाभिश्च सुरेन्द्राणां ... निर्मितो नृपः" इति] ॥११॥

রাজা গৃহে আগত হইলে তাঁহার অভ্যর্থনার জন্য ... অঞ্জলিবন্ধনে যে কষ্ট, ও আসন পরিত্যাগ করিয়া উঠিতে ... অনুপ্রবিষ্ট গর্ভের ভারে যে প্রযত্ন, হইত, তাহাতে তাঁহার আনন্দ

Miscellaneous Notes.

1. प्रियानुरागस्य—*Of his affection* प्रियायाम् अनुरागः प्रियानुरागः, सुप्सुपेति समासः, तस्य। वनिताप्रेम्णः। 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' इति तुल्यार्थ-'सदृशी'-शब्दयोगात् षष्ठी ; प्रियानुरागेण is also correct.

2. मनःसमुन्नतेः—Of his high-mindedness मनसः समुन्नतिः मनःसमुन्नतिः, तस्याः। चित्तोत्कर्षस्य औदार्यस्य वा। षष्ठी *as in note* I.

3. भुजार्जितानाम्—भुजेन लक्षणया भुजबलेन अर्जिताः, तासाम्। बाहुबललब्धानाम्। Qualifies दिगन्तसम्पदाम्। *Mallinátha* gives the alternative meaning भुजेन करेण by *rent.* But I have not been able to trace this meaning of भुज। Besides if *rent* had been intended, the poet could have easily written कराहृतानाम् which also would have preserved the metre and the alliteration.

4. दिगन्तसम्पदाम्—दिशाम् अन्ताः सीमानः दिगन्ताः। दिगन्तेषु सम्पदः वैभवानि दिगन्तसम्पदः, सुप्सुपेति समासः। तासाम्। मेदिनीमण्डलवित्तानाम्। षष्ठी as in note I.

5. यथाक्रमम्—In order. क्रमेण। अव्ययीभाव। Adverb (क्रियावि—) qualifying व्यधत्त।

6. पुंसवनादिकाः—पुमस् + सू + ल्युट् करणे = पुंसवनम् a ceremony performed in the second or third month of conception. पुंसवनम् आदिः यासां ताः पुंसवनादिकाः, 'शेषाद् विभाषा' इति समासान्तः कप्। ताः। पुंसवनप्रभृतीः। Qualifies क्रियाः। Here *Mallinátha* remarks—'आदि includes अनवलोभन and सीमन्तोन्नयन। The first, पुंसवन, is to be performed in the 2nd or 3rd month when the moon is in conjunction with a male star; अनवलोभन in the 4th month, and सीमन्तोन्नयन in the 6th or the 8th month.

7. क्रिया—कृ + श भावे = क्रियाः, ताः ; accusative of व्यधत्त।

8. धृतेः—षष्ठी as in note I. *Mallinátha* takes धृति in the sense of सन्तोष—'पुत्रो मे भविष्यति इति सन्तोषस्य'। It may also be taken in its ordinary sense धैर्य, patience, particularly as it is used along with the epithet धीरः।

9. सदृशी:—समान इव पश्यन्ति इति समान + दृश + कञ् कर्तरि। [by the *Vârttika* 'समानान्ययोश्च इति वक्तव्यम्'—दृश takes कञ् also; when

not implying *seeing*, if preceded by समान and अन्य] = स + दृश + क्स by the rule 'दृग्दृशवतुषु'—समान becomes स when दृक् and दृश follow = सदृक्षः स्निग्धान्, ताः। अनुक्ताः। Qualifies क्रियाः। 'सादृश्यादयो हि सदृशशब्दप्रकाराः नैवात्र दर्शनक्रिया विद्यते'।

10. व्यधत्त—विदधे performed वि + धा + लङ् त [conj. II. 43].

11. *Change of voice.*—...धीरैः तैः...सदृक्षः .. व्यधीयन्त।

सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया गृहागतः।
तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्लवनेत्रया नृपः॥११॥

Anvayabodhini.—'गृहागतः नृपः तया ननन्द' [दैनन्दिनं राजकार्यम् अनुष्ठाय गृहं प्रत्यागतः स राजा तथाविधां तां दृष्ट्वा आनन्दितोऽभवत्]। किम्भूतया तया स आनन्दं लेभे?—'पारिप्लवनेत्रया' [चञ्चललोचनया तया] नयनयोश्चाञ्चल्यं तु सदैव न तस्याः पश्यति, अत्र तस्य आनन्दहेतुः; तदनु हि विशेषतः किम्भूतया तया स ननन्द—'सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया' [अष्टाभिः सुरेन्द्राणां मात्राभिः अनुप्रविष्टः स गर्भः अधुना प्रसवसमये अतीव गुरुभारो जातः; तत् गृहागते भर्तरि आचारात् सम्माननार्थम् आसनात् उत्थातुकामायाः तस्याः प्रयत्नातिशयं दृष्ट्वा, आसन्नप्रसवेयम् इति स राजा मेने, ननन्द च]। बुध्यते, ब्रूहि पुनरपि किम्भूतया स ननन्द—'उपचाराञ्जलिखिन्नहस्तया' [आसनादुत्थिता सा राज्ञः पूजार्थम् अञ्जलिं बबन्ध, तदानु दौर्बल्यात् हस्तौ तस्याः शिथिलौ जातौ; एतच्च प्रसवस्य आसन्नतां सूचयित्वा तम् आनन्दयामास]।

Prose order.—गृहागतः नृपः, सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया, उपचाराञ्जलिखिन्नहस्तया, पारिप्लवनेत्रया तया ननन्द।

Sanjivani—सुरेन्द्रेति 'गृहागतः' नृपः 'सुरेन्द्राणां' लोकपालानां 'मात्राभिः' अंशैः 'आश्रितस्य' अनुप्रविष्टस्य 'गर्भस्य गौरवात् प्रयत्नेन मुक्तासनया' आसनादुत्थितयेत्यर्थः। 'उपचारस्य अञ्जलौ' अञ्जलिकरणे 'खिन्नहस्तया पारिप्लवनेत्रया' तरलाक्ष्या ["चञ्चलं तरलं चैव पारिप्लवपरिप्लवे" इत्यमरः] 'तया' सुदक्षिणया 'ननन्द' [सुरेन्द्रमात्राश्रितत्वे मनुः—"अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः" इति]॥११॥

রাজা গৃহে আগত হইলে তাঁহার অভ্যর্থনার জন্য চঞ্চললোচনা সেই রাজ্ঞীর অঞ্জলিবন্ধনে যে কষ্ট, ও আসন পরিত্যাগ করিয়া উঠিতে দিক্‌পালগণের প্রভাবকর্তৃক অনুপ্রবিষ্ট গর্ভের ভারে যে প্রযত্ন, হইত, তাহাতে তাঁহার আনন্দ হইত। ১১।

दृष्टे तव स्तोत्र ... कस्मात् स्थास्यति
...: ... ... ।

6. ननन्द—समृद्धे। नन्द्+लिट् ण [conj. I. 57].

7. पारिप्लवनेत्रया—चञ्चलनेत्रया ; परितः प्लवते गच्छति इति परि + प्लु + अच् कर्त्तरि = परिप्लवम् ; परिप्लव एव इति परिप्लव + अण् स्वार्थे = पारिप्लव चञ्चलम्। पारिप्लवे नेत्रे यस्याः तया। Qualifies तया। The equivalent चञ्चलाक्ष्या given by *Mallinātha* does not imply that her eyes *watered* by the exertion. तरल means चञ्चल। Indeed पारिप्लवनेत्रता [or its equivalent चञ्चलनेत्रता] has nothiug to do with pregnancy. It is a general characteristic of *all* females, and is an indication of natural timidity. Instances of the use of पारिप्लवनेत्रता to women *in general* could be cited by thousands from Sanskrit writers. I shall quote a few only—

'मुखं यदि किमिन्दुना यदि चलाञ्चले लोचने
किमुत्पलकदम्बकैर्यदि तरङ्गभङ्गी भ्रुवौ।'—*Bhavabhūti*
'निःशेषशीतांशुभासा ... नयनद्वयम्।
... चञ्चलम्।'—*Jagannatha.*
'शशाङ्कमुखी ... तरलायताक्षी।'—*Mammata.*
'किं न किञ्चित् ... तरलतरलो दृष्टिविभवः।'—*Bhartrihari.*

8. *Change of voice.*—...महीपतिना नृपेण...ननन्दे।

कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव॥१२

Anvayabodhini.—'अथ पतिः प्रतीतः (सन्) प्रियां दिवम् इव ददर्श [अनन्तरं स राजा हृष्टः सन् आकाशमिव तां सुदक्षिणां ददर्श]। आकाशं दृष्ट्वा प्रीतिर्भवति इति सूचनकुशलेन भवता—'अभ्रितां (दिवमिव ददर्श)' [वर्षणोन्मुखीं दिवं दृष्ट्वा यथा जनो हृष्यति तथा सोऽपि सुदक्षिणां दृष्ट्वा प्रीतम् अन्वभूत्]। अथ किम्भूतां ताम् अभ्रितां दिवमिव ददर्श?—'प्रसवोन्मुखीम्' [आसन्नप्रसवां ताम् आसन्नवर्षणां दिवमिव ददर्श]। कदा ददर्श?—'काले' [आगतासु वर्षासु वर्षणोन्मुखीं दिवं दृष्ट्वा यथा प्रीतिर्भवति, प्राप्ते च दशमे मासि प्रसवोन्मुखीं राज्ञीं दृष्ट्वाऽपि तथैवाभूत् तस्य प्रीतिः]। कुमारभृत्याकुशलैः आप्तैः भिषग्भिः अनुष्ठितेऽपि गर्भः प्राप्तकाल एवाभूत्-

सुमे तव भर्यीत ततप्रघनतो लह्याज्ञ मध्यानिति
प्राप्ते: पुवि निवेदित: कुलवधूसिद्धान्तधर्मागम: ।

6. ननन्द—मुमुदे। नन्द्+लिट् ण [conj. I. 57].

7. पारिप्लवनेत्रया—चञ्चललोचनया ; परिप्लवते सर्वतो गच्छति इति परि+प्लु+अच् कर्त्तरि=परिप्लवम् ; परिप्लवमेव इति परिप्लव+अण् स्वार्थे=पारिप्लवं चञ्चलम्। पारिप्लवे नेत्रे यस्या: तया। Qnalifies तया। The equivalent तरलाक्ष्या given by *Mallinátha* does not imply that her eyes *watered* by the exertion. तरल means चञ्चल। Indeed पारिप्लवनेत्रता [or its equivalent चञ्चललोचनता] has nothiug to do with pregnancy. It is a general characteristic of *all* females, and is an indication of natural timidity. Instances of the use of पारिप्लवनेत्रता to women *in general* could be cited by thousands from Sanskrit writers. I shall quote a few only—

'मुखं यदि किमिन्दुना यदि चलाञ्चले लोचने
किमुत्पलकदम्बकैर्यदि तरङ्गभङ्गी भ्रुवो: ।'—*Bhavabhúti*
'नि:सीमशोभासौभाग्यं नताङ्ग्या नयनद्वयम् ।
अन्योन्यालोकनानन्दविरहादिव चञ्चलम् ॥'—*Jagannatha.*
'शशाङ्कसुधाकरमुखी तरलायतताक्षी ।'—*Mammata.*
'स्मितं किञ्चित् वक्त्रे सरलतरलो दृष्टिविभव: ।'—*Bhartrihari.*

8. *Change of voice.*—...दृष्टानतेन नृपेण...ननन्दे ।

कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि ।
पति: प्रतीत: प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ॥१२

Anvayabodhini.—'अथ पति: प्रतीत: सन्) प्रियां दिवम् इव ददर्श [अनन्तरं स राजा हृष्ट: सन् आकाशमिव तां मुदयितां ददर्श]। आकाशं दृष्ट्वा प्रीतिर्भवति इति नूतनमुच्यते भवता—'अभ्रितां (दिवमिव ददर्श)' [वर्षोन्मुखीं दिवं दृष्ट्वा यथा जनो हृष्यति तथा सोऽपि मुदयितां दृष्ट्वा प्रीतम् अनुभूत]। अथ किम्भूतां ताम् अभितां दिवमिव ददर्श ?—प्रसवोन्मुखीम्' [आसन्नप्रसवां ताम् आसन्नवर्षां दिवमिव ददर्श]। कदा ददर्श ?—'काले' [आगताम् वर्षासु वर्षोन्मुखीं दिवं दृष्ट्वा यथा प्रीतिर्भवति, प्रसव च दशमे मासि प्रसवोन्मुखीं राज्ञीं दृष्ट्वापि तदैवाभूत् तस्य प्रीति:]। सुरेन्द्रादां मात्राभि: आहितोऽपि गर्भ: प्रसकाल एवाभूत-

अन्यथा न नियमः, इति विवक्षितम्—'गर्भभर्मणि अनुष्ठिते (सति, काले ददर्श)' [गर्भरक्षार्थे यथोचिते विधौ अनुष्ठिते सति गर्भदोषो निराकृतः, गर्भोऽपि निर्विघ्नं पालनक्षमोऽभूत्]। तत्र निपुणैरेव अनुष्ठितोऽभूत् स विधिः—'कुमारभृत्याकुशलैः आप्तैः भिषग्भिः (अनुष्ठिते सति)' [ये च शास्त्रोक्त कुमारभृत्यानामप्रकरणस्य मर्मज्ञाः आप्ताश्च चिकित्सकाः गर्भरक्षार्थे शास्त्रीये विधौ अनुष्ठिते सति, प्रसूतिसमयो ... दूरीकृताः, गर्भेण दश मासान् धृतः, ततो प्रसवोन्मुखीं सुदक्षिणां प्रसवोन्मुखीं दिवमिव स राजा सहर्षं ददर्श]।

Prose order.—अथ कुमारभृत्याकुशलैः आप्तैः भिषग्भिः गर्भभर्मणि अनुष्ठिते (सति), काले प्रसवोन्मुखीं प्रियां अभ्रितां दिवम् इव पतिः प्रतीतः (सन्) ददर्श।

Sanjivani - कुमारेति। 'अथ कुमारभृत्या' बालचिकित्सा ["संज्ञायां समजनिषद..." इति क्यप्] तस्यां 'कुशलैः' कृतिभिः ["कृती कुशलः" इत्यमरः] 'आप्तैः' हितैः 'भिषग्भिः' वैद्यैः ["भिषग्वैद्यौ चिकित्सके" इत्यमरः] 'गर्भभर्मणि' भरणे ["भृञ् पोषणे धारणे च" इति धातोः, "मनिन्" इति मनिन् प्रत्ययः; भर्म पोषणम्] 'अनुष्ठिते' कृते सति 'काले' दशमे मासि ... 'प्रसवोन्मुखीं' ... 'प्रियां' ... 'अभ्रितां' ... 'दिवम् इव' 'पतिः' भर्ता 'प्रतीतः' हृष्टः सन् ["ख्याते हृष्टे प्रतीतः" इत्यमरः] 'ददर्श' दृष्टवान् [...] ॥ १२ ॥

অনন্তর কুমারভৃত্যায় নিপুণ বিশ্বস্ত চিকিৎসকগণ কর্তৃক গর্ভপোষণবিধি অনুষ্ঠিত হইলে, যথাকালে প্রসবোন্মুখী প্রিয়াকে সানন্দচিত্তে মেঘাচ্ছন্ন আকাশের ন্যায় দর্শন করিলেন। ১২।

..., the ceremonies for the maintenance of the foetus having ... performed by trusty physicians versed in obstetrics, the ... husband deemed his parturient beloved like the sky over-... (12).

Miscellaneous Notes.

deals with the proper development of the fœtus, taking care of the mother during the latter days of pregnancy &c.—'कुमारभृत्या गर्भिण्याः परिचर्य्याऽभिधीयते ।'—Háràvalí, कौमारभृत्यं नाम कुमारभरणधात्री-क्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम्'—*Sus'ruta.* कुशं लाति गृह्णाति इति कुशलः *lit*, one who plucks the blades of the *kusa* grass. But as it requires much skill to pluck the sharp blades without injuring one's fingers, कुशल has come to mean *skilful.* कुमारभृत्यायां कुशलाः कुमारभृत्याकुशलाः, तैः । बालचिकित्सानिपुणैः । अनुक्ते कर्त्तरि तृतीया ।

2 अनुष्ठिते—अनु+स्था+क्त कर्म्मणि=अनुष्ठितम् तस्मिन् । Qualifies गर्भभर्मणि ।

3. भिषग्भिः—भिषज्यति इति भिषज+यक (कण्ड्वादि)+क्विप्=भिषक् the physician.

4 आप्तैः—प्रत्ययितैः *i. e.* by trusty physicians.

5. गर्भभर्मणि—गर्भस्य भर्म भरणम् गर्भभर्म ; तस्मिन् । गर्भभरणे । According to the Sidhánta Kaumudi the affix is मनिन् and not मनिच् [सर्वधातुभ्यो मनिन् (उणादि)] ।

6. प्रतीतः—प्रति+इ+क्त कर्त्तरि=प्रतीतः हृष्टः । In this sense compare 'तदेति तस्याविततं प्रतीतः प्रत्यग्रहीत् सङ्गरमग्रजन्मा'—V. 26. Qualifies पतिः, which refers to दिलीपः ।

7. प्रसवोन्मुखीम्—उद्गतं मुखमस्याः इति उन्मुखी उद्युक्ता (See note on आसमुद्रक्षितीशानाम् I. 54). प्रसवे प्रसवस्य वा उन्मुखी, प्रसवोन्मुखी ताम् । Qualifies प्रियाम् which refers to सुदक्षिणा ।

8. काले—Has a double sense (1) in the tenth month, (2) at the advent of the rains.

9. अभ्रिताम्—अभ्र+इतच्=अभ्रिता, सञ्जातमेघा, नवमेघोदया ; ताम् । Qualifies दिवम् ।

10. *Change of voice.*—...प्रसवोन्मुखी प्रिया अभ्रिता द्यौः इव पत्या प्रतीतेन (सता) ददृशे ।

ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्य्यगैः सूचितभाग्यसम्पदम् ।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥१३॥

अन्यरा न विपन्नः, इति चित्रमेतत्—'गर्भभर्मणि अनुष्ठिते (सति, काले ददर्श)' [गर्भरक्षार्थे यथोचिते विधौ अनुष्ठिते सति गर्भदोषो निराकृतः, गर्भोऽपि निर्विघ्न पालकालोऽभूत्]। सम्यग् निपुणैरेव अनुष्ठितोऽभूत् स विधिः—'कुमारभृत्याकुशलैः आप्तैः भिषग्भिः (अनुष्ठिते सति)' [वैद्यशास्त्रोक्तस्य कुमारभृत्यानामप्रकरणस्य मर्मज्ञैः आप्तैः चिकित्सकैः गर्भरक्षार्थं शास्त्रीये विधौ अनुष्ठिते सति, प्रसूतिप्रभृतयो दोषा दूरीकृताः, गर्भश्च दश मासान् धृतः ; तदन्ते प्रसवोन्मुखीं सुदक्षिणां वर्षोन्मुखीं दिवमिव स राजा सहर्षं ददर्श]।

Prose order.—अथ कुमारभृत्याकुशलैः आप्तैः भिषग्भिः गर्भभर्मणि अनुष्ठिते (सति), काले प्रसवोन्मुखीं प्रियां अभ्रितां दिवम् इव पतिः प्रतीतः (सन्) ददर्श।

Sanjivani - कुमारेति। 'अथ कुमारभृत्या' बालचिकित्सा ["संज्ञायां समजनिषद"इत्यादिना क्यप्] तस्यां 'कुशलैः' कृतिभिः ["कृती कुशलः" इत्यमरः] 'आप्तैः' हितैः 'भिषग्भिः' वैद्यैः ["भिषग्वैद्यौ चिकित्सके" इत्यमरः] 'गर्भस्य भर्मणि' भरणे ["भरणे पोषणे भर्म" इति हैमः , "भृञोऽमिन्" इति शाश्वतः ; भर्मो मनिन्प्रत्ययः] 'अनुष्ठिते' कृते सति 'काले' दशमे मासि अनन्तरं गौणानन्तरे 'प्रसव' गर्भमोचनम् 'उन्मुखीम्' आसन्नप्रसवाम् इत्यर्थः ['स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः] 'प्रियां' भार्याम् अभ्राणि अस्याः सञ्जातानि 'अभ्रिता' ताम् ["तदस्य सञ्जातं तारकादिभ्य इतच्" इति इतच्प्रत्ययः] 'दिवम् इव पतिः' भर्ता 'प्रतीतः' हृष्टः सन् ["ख्याते हृष्टे प्रतीतः" इत्यमरः] 'ददर्श' दृष्टवान् [गर्भकर्माणीति [illegible]] ॥ १२ ॥

[illegible]

[illegible], the ceremonies for the maintenance of the fœtus having [illegible] by trusty physicians versed in obstetrics, the [illegible] husband deemed his parturient beloved like the sky over[illegible] (12).

Miscellaneous Notes.

स्वस्थानानि च नीचानि; तत्र उच्चेष्वपि दशमादयो राशित्रिंशांशाः यथाक्रमम् उच्चेषु परमोच्चा, नीचेषु परमनीचा, इति जातकश्लोकार्थः। अंशस्त्रिंशो भागः। यदाह नारदः, "त्रिंशद्भागात्मकं लग्नम्" इति। सूर्यसम्पर्करहितत्वादस्तमयो नाम। तदुक्तं लघुजातके, "रविणास्तमयो योगो वियोगस्तूदयो भवेत्" इति। ते च स्वोच्चस्थाः फलन्ति नास्तगा नापि नीचगाः। तदुक्तं राजमार्तण्डे—"स्वोच्चे पूर्णं स्वर्क्षेऽर्धं सुहृद्भे पादं द्विड्भेऽल्पं शुभं दिशन्ति। नीचस्थायी नास्तगो वा न किञ्चित् पादं न्यूनं स्वत्रिकोणे ददाति।" इति। तदिदमाह कविः, उच्चसंश्रयैरसूर्यगैः इति च। एवं सति, यस्य जन्मकाले पञ्चप्रभृतयो ग्रहाः स्वोच्चस्थाः स एव नृपो भवति। तदुक्तं वृद्धयवने—"उत्कृष्टाः स्वोच्चसंस्थाः प्रकटकार्या राजप्रतिरूपकाय। राजानः एकद्वित्रिचतुर्भिर्जायन्तेऽतः परं दिव्याः" इति तदिदमाह पञ्चभिरिति]॥ १३ ॥

অনন্তর ত্রিসাধনাশক্তি যেমন অক্ষয় নিধি প্রসব করে, সেইরূপ শচীসমা (রাজ্ঞী) যথাকালে একটি পুত্র প্রসব করিলেন; উচ্চস্থানস্থ সূর্যসম্পর্করহিত পাঁচটি গ্রহ (ঐ বালকের) ভাগ্যাধিক্য সূচিত করিল। ১৩।

At length, as power caused by three agencies produces inexhaustible wealth,(she), the equal of Sachi, in time, gave birth to a boy the excess of whose fortune was augured by five planets in the ascendant and not in conjunction with the sun. (13).

Miscellaneous Notes.

1. ग्रहैः—गृह्णन्ति रवितेजांसि इति, or गृह्णन्ति भाविशुभाशुभफलयोजनया आयत्तीकुर्वन्ति नरान् इति ग्रह्+अच् कर्तरि=ग्रहाः by the rule 'विभाषा ग्रहः'—the root ग्रह takes ण in the कर्तृवाच्य to mean an *alligator*, and अच् in the कर्तृवाच्य to mean a *planet*. Or again गृह्यन्ते रविरश्मिभिराहत्य तिरस्क्रियन्ते इति, गृह्यन्ते राहुणा इति वा, ग्रह्+अप् कर्मणि =ग्रहाः by the rule 'ग्रह-वृ-दृ-निश्चि-गमश्च'। तैः। अनुक्ते कर्तरि तृतीया। It is nominative to the verb in सूचितभाग्यसम्पदम्।

2. उच्चसंश्रयैः—In the ascendant, सं+श्रि+अच् भावे=संश्रयः अवस्थानम्; उच्चः संश्रयः अवस्थानं स्थितिः येषां, तैः। Or संश्रियन्ते इति सम्+श्रि+अच् कर्मणि=संश्रयाः स्थानानि; उच्चाः संश्रयाः येषां, तैः। Qualifies ग्रहैः। The ascendancy of planets is determined by their position in the twelve lunar mansions (राशि)। The *Sloka* 'अजवृषभ—'quoted by *Mallinātha* means—If each lunar mansion (राशि) be supposed to be divided into 30 equal parts, then सूर्य is said to be

14. [illegible]—...निर्वृत्ति [illegible] (...)...(...)।

15. [illegible]—So at the birth of [illegible]—

"[illegible] ।

[illegible] ॥"—*Kumâra.*

अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ॥१५॥

Anvayabodhini.—'निशीथदीपाः आलेख्यसमर्पिता इव बभूवुः' [चित्रे लिखिता दीपाः यथा दीपा इति प्रतीयन्ते एव, परन्तु दीपकार्यं न कुर्वन्ति, तथा तत्र सूतिकागृहे ते दीपा आसन् न च स्वकार्यं कृतवन्त इति तथैव बभूवुः]। किं तत्र कारणमासीत् ?—'सुजन्मनः तस्य निजेन तेजसा हतत्विषः (सन्तः)' [शुभ जातस्य तस्य शिशोः नैसर्गिकेण तेजसा अकस्मात् हतप्रभाः सन्तः ते दीपाः, स्वकार्यं कर्तुं अक्षमाः, चित्रे लिखिता इव बभूवुः]। किम्भूतेन तेजसा ?—'अरिष्टशय्यां परितः विसारिणा' [सूतिके एव तस्मिन् शिशोः सूतिकागृहे स्थितायाः शय्यायाः समन्तात् प्रसृतानि तस्य स्वाभाविकानि तेजांसि, तत्रत्यानां दीपानां तेजांसि अभिभूय, तान् चित्रलिखितान् इव दीपान् निष्फलान् चक्रुः]।

Prose order—अरिष्टशय्यां परितः विसारिणा सुजन्मनः तस्य निजेन तेजसा सहसा हतत्विषः (सन्तः) निशीथदीपाः आलेख्यसमर्पिताः इव बभूवुः ।

Sanjivani—अरिष्टेति । ["अरिष्टं सूतिकागृहम्" इत्यमरः] 'अरिष्टे सूतिकागृहे शय्यां तस्य परितः' अभितः ["अभितः परितः समयानिकषाहाप्रतियोगेऽपि" इति द्वितीया] 'विसारिणा सुजन्मनः' शोभनजन्मनः ["जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः" इत्यमरः] 'तस्य शिशोः' 'निजेन' नैसर्गिकेण 'तेजसा सहसा हतत्विषः' लुप्तकान्तयः 'निशीथदीपाः' अर्धरात्रप्रदीपाः ["अर्धरात्रनिशीथौ द्वौ" इत्यमरः] आलेख्यसमर्पिताः चित्रार्पिताः 'इव बभूवुः' । निशीथग्रहणं दीपानां प्रभाधिक्यसम्भावनार्थम् ॥ १५ ॥

সূতিকাগারের শয্যার চারিদিকে প্রসৃত সেই সুজন্মা বালকের স্বাভাবিক তেজে অর্ধরাত্রের প্রদীপগুলি যেন সহসা দীপ্তিহীন হইয়া চিত্রিত দীপের ন্যায় হইয়া গেল ॥ ১৫ ॥

The midnight lamps, suddenly robbed of light by the natural glow of that well-born-babe spreading itself around the bed in the ing-in-room, like painted lights. (15).

গ্রহণ করিলেন ; সকলই শুভসূচক হইল। (বস্তুতঃ) তাদৃশ ব্যক্তির জন্ম লোকহিতার্থই হইয়া থাকে ॥ ১৪ ॥

At that moment the quarters cleared up ; pleasant breezes blew : the (sacred) fire accepted clarified butter with a flame turning to the right ; every thing assumed an auspicious form ; indeed the birth of his like is for the good of the world. (14).

Miscellaneous Notes.

1. दिशः—दिशन्ति ताः इति दिश् + क्विन् कर्मणि = दिशः निपातनात् ।

2. प्रसेदुः – Cleared up प्र + सद् + लिट् उस् [conj. I. 89.]

3. सुखाः – सुखयन्ति इति सुख + णिच् + अच् कर्तरि = सुखाः सुखकराः । Qualifies मरुतः ।

4. ववुः—Blew. वान्ति स्म । वा + लिट् उस् [लट् वाति, लोट् वातु, लङ् अवात्, विधिलिङ् वायात्, लिट् ववौ, लुङ् अवासीत्]।

5. प्रदक्षिणार्चिः प्रगता दक्षिणा प्रदक्षिणा turning to the right 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति प्रादिसमासः । प्रदक्षिणा अर्चिः यस्य, सः Qualifies अग्निः । [See note on प्रदक्षिणार्चिर्व्याजेन, IV. 25]। अर्चि and अर्चिस् both mean a *flame* The latter is both feminine and neuter.

6. आददे – आ + दा + लिट् ए [conj. I. 18.] अकर्त्रभिप्राये क्रियाफले 'आङो दः अनास्यविहरणे' इति आत्मनेपदम् ।(See I. 18).

7. सर्वम्—सकलम् । यावतां वस्तुजातम् ।

8 शुभशंसि – मङ्गलसूचकम् । Qualifies सर्वम् ।

9. तत्क्षणम्—स एव क्षणः तत्क्षणः, तत्क्षणः ; तम् । [illegible] । [illegible] See *Sanjīvanī.*

10 भवः—भवन्ति प्राणिनः अस्मात् इति भू + अप् कर्तरि = भवः जन्म । Or भवत्यनेन इति "पुंसि संज्ञायां घः –" करणे । Bhanuji has "भावे अप्" which is a slip. अप् is not available because it is barred by the rule "ऋदोरप्" Here भू having no ऋवर्ण cannot take अप् ।

11. हि – यतः , यस्मात् भवः लोकाभ्युदयाय भवति ; or अवधारणे [illegible] भवः लोकाभ्युदयाय एव भवति ।

12. लोकाभ्युदयाय—लोकानाम् अभ्युदयः मङ्गलं लोकाभ्युदयः ; तस्मै । 'क्लृपि सम्पद्यमाने च' इति चतुर्थी ।

13. तादृशाम्—Genitive plural of तादृश् ; तद् + दृश् + क्विन् = तादृश्,

जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसम्मिताक्षरम्।
अदेयमासीत् त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ॥

Anvayabodhini.—'भूपतेः त्रयम् एव अदेयम् आसीत्' [भूपतिः दि... यदन्यत् सर्वमपि तस्मै दातुं तदा समर्थ आसीत्]। किं त्रयम् ... 'शशिप्रभं छत्रम्, उभे चामरे च' [प्रभ ... हे चामरे च, इति राजचिह्नं ... विहाय, यदेव कस्मैचित् प्रदेयत्वेन न तस्मै अदात्]। कस्मै पुनः ... देयम् ?—'शुद्धान्तचराय जनाय' [अन्तःपुरस्य वार्तावाहकाय जनाय], ... नाम प्रियं तेन कथितं, यत् तस्मै अदेयं नासीत्, तदाह—किंभूताय जनाय—'अमृ... सम्मिताक्षरं कुमारजन्म शंसते (जनाय)' [''राज्ञो पुत्र प्रसूता'' इति वाक्यस्य एकैक... अक्षरं स राजा एकैकममृततुल्यमिव मेने; तथाविधं प्रियं वाक्यं कथयते जनाय तस्य अपर किमपि अदेयं न आसीत्]।

Prose order.—भूपतेः अमृतसम्मिताक्षरं कुमारजन्म शंसते शुद्धान्तचराय जनाय त्रयम् एव अदेयम् आसीत्—शशिप्रभं छत्रम्, उभे चामरे च।

Sanjivani.—जनायेति। 'भूपतेः' दिलीपस्य 'अमृतसम्मिताक्षरम्' अमृत... समानाक्षरम् [''समसम्मितौ.'' इत्यादि] 'कुमारजन्म' पुत्रोत्पत्तिं 'शंसते' कथयते 'शुद्धान्तचराय' अन्तःपुरचारिणे 'जनाय त्रयम् एव अदेयम् आसीत्'। किं तत्? 'शशिप्रभम्' उज्ज्वलं 'छत्रम्, उभे चामरे च' छत्रादीनां राज्ञः प्रधानाङ्गत्वात् इति भावः ॥ १६ ॥

... (Devanagari translation, largely illegible) ... ॥ १६ ॥

To the person, attendant upon the harem, announcing the birth of a boy, the syllables of which announcement were like nectar, only three things of the king were unbestowable—his umbrella shining as the moon and the two chownes. (16).

Miscellaneous Notes.

1. शुद्धान्तचराय—शुद्धाः, ... अन्तःपुरम्; 'स्यादन्तःपुरमवरोधनम्'। शुद्धान्तचारवरोधम्—' ... शुद्धान्ते चरति तद् ... इति शुद्धान्त + चर् + ट कर्तरि = शुद्धान्तचरः; तस्मै। चतुर्थी सम्प्रदाने by the rule 'कर्मणा यमभिप्रैति स सम्प्रदानम्'।

4. एत्य—Having arrived आ + इ + ल्यप् (conj. I. 71).

5. पुरोधसा—पुरः अग्रे धीयते स्थाप्यते इति पुरस् + धा + असि (औणादिक) कर्मणि = पुरोधाः । तेन । अनुक्ते कर्तरि तृतीया ।

6. दिलीपसूनुः—दिलीपस्य सूनुः पुत्रः दिलीपसूनुः । 'सूनुः पुत्रेऽनुजेऽर्के ना' इति मेदिनी ।

7. आकरोद्भवः—आकरन्ति धातून् अत्र, आकीर्यन्ते धातवः अत्र इति वा, आ + कृ + घ अधिकरणे = आकरः a mine, by the rule 'पुंसि संज्ञायां घः प्रायेण' इत्यमरटीकाकाराः ; एत्य तस्मिन् कुर्वन्ति इति आ + कृ + घ अधिकरणे = आकरः इति वामनः । उद्भवत्यस्मात् इति उत् + भू + अप् अपादाने = उद्भवः Source ; आकरः उद्भवः उत्पत्तिस्थानम् अस्य इति आकरोद्भवः; qualifies मणिः ।

8. पटुसंस्कारः—संस्क्रियते शुध्यते अनेन इति सम् + कृ + घञ् करणे = संस्कारः by the rule 'संपर्युपेभ्यः करोतौ भूषणे', see note on संस्कार I. 20. Now see *Sanjivani*. Qualifies मणिः । This applies also to दिलीपसूनुः who was पटुसंस्कार by वशिष्ठ ।

9 बभौ—राजते स्म shone. भा + लिट् अ [लट् भाति, लोट् भातु, लङ् अभात्, विधिलिङ् भायात्, लुङ् अभासीत्] ।

10. *Change of voice.*—...तेन दिलीपसूनुना...पटुसंस्कारेण आकरोद्भवेन मणिना इव बभे ।

सुखश्रवा मङ्गलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि ॥१९॥

Anvayabodhini.—'मङ्गलतूर्यनिस्वनाः केवलं मागधीपतेः सद्मनि न व्यजृम्भन्त' [मङ्गलार्थं भेरीरवाः तदानीं केवलं दिलीपस्यैव गृहे न श्रुताः, अपितु अन्यत्रापि] । क्व पुनरन्यत्र ?—'दिवौकसाम् पथि अपि (व्यजृम्भन्त)' [देवानामपि विहरणपथे आकाशे तदानीं दुन्दुभिरवाः श्रुताः] । किम्भूताः मङ्गलतूर्यनिस्वनाः ?—'सुखश्रवाः [श्रुतिसुखाः रवाः श्रुताः]' । किं तदानीं तूर्यस्वनाः केवला एव व्यजृम्भन्त ?—'वारयोषितां प्रमोदनृत्यैः सह (व्यजृम्भन्त)' [उत्सवार्थं वेश्यास्तदानीम् अनृत्यन् ; तासां नृत्यानि दुन्दुभेरिव नादाः पुनरपि व्यजृम्भन्त] ।

Prose order.—सुखश्रवाः (श्रुतिसुखाः) मङ्गलतूर्यनिस्वनाः (शुभवाद्यध्वनयः) वारयोषितां (वेश्यानां) प्रमोदनृत्यैः (हर्षनर्तनैः) सह (समं) मागधीपतेः

8. दिवौकसाम्—*Mallinātha* has द्यौः ओको येषाम् = दिव् + ओकस् = दिव् + अ + ओकस् = दिव + ओकस = दिवौकसः. पृषोदरादित्वात् अकारागमः । But it is not necessary to suppose irregularity (पृषोदरादित्व) if we take it as a compound of the word दिव instead of दिव् । 'मन्दर. कैरिवः सुरभवनं खं दिवं नभः' इति त्रिकाण्डशेषः ; also compare *Bhuddha-charita* quoted by *Raghunātha*—

वनन्तु दर्भेण समन्वितं पुरं पुरञ्च दर्भेण विवर्जितं वनम् ।
न शोभते तेन हि नो विना पुरं मरुत्वता वृत्रवधे यथा दिवम् ॥

Hence we expound दिवम् ओकः निवासो येषां ते दिवौकसः ; तेषाम् । शेषे षष्ठी the समास being with षष्ठि ।

9. दिवौकसां पथि—In the path of gods *i. e.* in the sky.

10. *Change of voice.*— .. सुतजन्मनि मङ्गलतूर्यनिस्वनैः...व्यजृम्भत... (व्यजृम्भ्यत ।)

न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद् यं सुतजन्महर्षितः ।
ऋणाभिधानात् स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ॥ २०

Anvayabodhini.—अस्मिन् सुतजन्मना हर्षितः स कारागतान् अपराधिजनान् बन्धनात् एव मुमोच—'तदा स स्वयम् एव केवलं मुमुचे' [तदानीम् एकलः स एव मुक्तोऽभवत्]। अन्यानि एव ते, कुतः पुनरस्य बन्धनं यत् स मुक्तोऽभूत् इत्युच्यते ?—'पितॄणाम् ऋणाभिधानात् बन्धनात् (मुमुचे)' [बन्धनञ्च तस्य आसीत् एव, पितॄणाम् ऋणाख्यं बन्धनं हि तत् ; तस्मादेव मोचनमिच्छता तेन "तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि" इत्यादि स भगवान् वशिष्ठः प्राक् प्रार्थितः। ऋषेः प्रसादात् अधुना पुत्रोत्पत्तिं पश्यन् स तस्मात् ऋणपाशात् मुक्तः]। आत्मना मुक्तोऽपि कथमपरान् कारागतान् न स मोचयेत् ?—'रक्षितुः तस्य संयतः न बभूव यं सुतजन्महर्षितः (सन्) विसर्जयेत्' [तस्य अभूतपूर्वस्य रक्षाविधानस्य प्रभावात् प्रजासु उत्पथप्रस्थितः कोऽपि नासीत्, यं स निबध्य कारां नयेत ; तत् तदानीं हर्षितोऽपि मोचनीयाभावात् कमपि न अमोचयत्, परन्तु स्वयमेव पितॄणां ऋणबन्धनात् मुमुचे]।

Prose order.—रक्षितुः (गोप्तुः) तस्य संयतः (बद्धः) न बभूव (आसीत्) सुतजन्महर्षितः (पुत्रोत्पत्तितोषितः सन् सः) यं विसर्जयेत् (मोचयेत्) सः तदा (तत्-काले) पितॄणां (पूर्वेषां) ऋणाभिधानात् (ऋणसंज्ञकात्) बन्धनात् (पाशात्) केवलं (एकं यथा तथा) स्वयं (आत्मना) एव मुमुचे (मुक्तः)।

takes ककुभं कर्मणि तृतीया; (उभे कर्मणि) कुतस्त्य दिगन्तं व्यतिक्रम. (ककुभं कर्मणि) कुतस्त्यत्वा 'कर्मणि द्वितीया'। But if we suppose ककुभ to be a नद्युत with the affix क्यप् then कुतस्त्यत्व takes ईहितं तृतीया and the *Sandhi* is guided by the rule 'ख्य स्था'।

8. नामाभिधानात्—From that whose name is *dik.* अभिधीयते अनेन इति अभि—धा+ल्युट् करणे—अभिधानम् नाम्ना name. नाम्नः अभिधानम् तत्, तस्मात्। Qualifies तस्मात्।

9. चिरम्—चिरम् एव यथा तथा। Adverb qualifying मुमुचे।

10. दिङ्नागान्—कर्तरि च कर्मणि षष्ठी। (दिङ्नागानि) दिशः कर्माणि. (कर्तरि) दिङ्नागं तस्मात्। Or दिङ्नाग: may be taken with नाम in the compound नामाभिधानात् which is to be justified by the maxim 'सापेक्षत्वेऽपि गमकत्वात् समासः'।

11. मुमुचे—Get released मुच्-लिट् ए कर्मकर्तरि [conj. I. 72.]

12. तस्मात्—'भीत्रार्थानां भयहेतुः' इत्यपादाने पञ्चमी।

13. *Change of voice.*—...तदभिख्य न तस्मै दुरतस्य...अनेन (तदा) तेन दः विसर्जित ;...तेन मुमुचे (भावे)।

श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवम् ॥ २१ ॥

Anvayabodhini—'अर्थवित् पार्थिवः आत्मसम्भवं नाम्ना रघुं चकार' [शब्दार्थवेदी: स्वस्य तनयं जातम् स राजा 'रघुः' इति तदाख्यं नाम चकार]। किम् अर्थम् आलोच्य स तस्य एतत् नाम चकार?—'धातोः गमनार्थम् अवेक्ष्य' [लङ्घ धातोः रघुरिति रूपं भवति, तस्य गमनार्थम् आलोच्य एतत् नाम चकार]। कथं तस्य गमनार्थे एतावान् आदरः?—'अयम् अर्भकः श्रुतस्य अन्तं यायात् इति' [अयं बालः वेदशास्त्रादं निखिलस्य शास्त्रार्थस्य पारं गच्छेत् इति हेतोः]। किमत्र अयमेक एव हेतुरस्त?—'तथा युधि परेषां च (अन्तं यायात् इति)' [न केवलं श्रुतस्य पारं यायात् इत्येव हेतुः, अपि तु समरे रिपूणाम् अन्तमपि यायात् इति हेतोः स तस्य गमनार्थात् लङ्घिधातोः सिद्धं रघुरिति नाम चकार]।

Prose order.—अर्थवित् (अभिज्ञेयज्ञ:) पार्थिवः (राजा) अयम् (एषः) अर्भकः (बालः) श्रुतस्य (शास्त्रस्य) अन्तं (पारं) यायात् (गच्छेत्) तथा (एवं)

ন দিন বর্দ্ধিত হয়, তেমনই, সমগ্র সম্পদের আকর পিতার প্রযত্নে, সেই বালকের শরীরের সুশোভন অবয়বগুলি বৃদ্ধি পাইতে লাগিল ॥ ২২ ॥

Owing to the care of his resourceful father, he daily cherished rowth with the beautiful limbs of his body, like the new moon rom the permeation of sun-light. (22).

Miscellaneous Notes.

1. प्रयत्नात्—प्रकृष्टो यत्नः प्रयत्नः ; तस्मात् हेतौ पञ्चमी ।

2. समग्रसम्पदः—समग्रा अखण्डा इति समग्रा अपरिहीना entire (See note on समग्रसम्पदा III. 2) : समग्रा सम्पत् यस्य सः समग्रसम्पत् ; तस्य । Qualifies पितुः । The force is, that, owing to the vastness or his resources, दिलीप could always attend to the wants of his child.

3. शुभैः—शोभन्ते इति शुभ + क कर्त्तरि = शुभाः by the rule 'इगुपधज्ञाप्रीकिरः कः'। This means—that which looks well, hence beautiful. It applies both to रघु and बालचन्द्रमाः । Qualifies शरीरावयवैः ।

4. शरीरावयवैः—शरीरस्य अवयवाः अङ्गानि शरीरावयवाः, तैः । तृतीया करणे । In the case of रघु, शरीरावयव means his limbs, and in the case of बालचन्द्रमा, it means the digits daily added to its body.

5. दिने दिने—Every day. The repitition is owing to the rule 'नित्यवीप्सयोः'—A word may be repeated to indicate *frequency* or *pervasion*. Here वृद्धि takes place *every day*, both in रघु and बालचन्द्रमाः ।

6. पुपोष—Cherished पुष् + लिट् ण [लट् पोषति—पुष्यति—पुष्णाति, लोट् पोषतु—पुष्यतु—पुष्णातु, लङ् अपोषत्—अपुष्यत्—अपुष्णात्, विधिलिङ् पोषेत्—पुष्येत्—पुष्णीयात्, लुङ् अपोषीत्—अपुषत्]

7. हरिदश्वदीधितेः—हरितः नामको हरितवर्णा अश्वा यस्य इति हरिदश्वः सूर्यः । The sun has seven horses in his chariot ; they are all of the colour हरित् (green), and are called by name also हरित । हरिदश्वस्य दीधितिः किरणः हरिदश्वदीधितिः ; तस्याः । हरिदश्व कर्त्तरि षष्ठी ; हरिदश्वदीधितिः अनुप्रविशति = हरिदश्वदीधितेः अनुप्रवेशः ।

8. अनुप्रवेशात्—अनु + प्र + विश + घञ् भावे = अनुप्रवेशः getting thoroughly into every part. हेतौ पञ्चमी ।

Prose order.—उमावृषाङ्कौ (गौरीशङ्करौ) शरजन्मना (कार्त्तिकेयेन) यथा (येन) शचीपुरन्दरौ (पुलोमजापाकशासनौ) जयन्तेन यथा (येन) तथा (तेन) तत्समौ (तत्तुल्यौ) सा मागधी (मगधकन्या) नृप (राजा) च (अपि) तत्सदृशेन (तत्तुल्येन) सुतेन (पुत्रेण) ननन्दतुः (तुतुषाते)।

Sanjivani.—उमेति। 'उमावृषाङ्कौ' पार्वतीवृषभध्वजौ 'शरजन्मना' कार्त्तिकेयेन ["कार्त्तिकेयो महासेनः शरजन्मा षडाननः" इत्यमरः] 'यथा' ननन्दतुः, 'शचीपुरन्दरौ जयन्तेन' जयन्ताख्येन सुतेन ["जयन्तः पाकशासनिः" इत्यमरः] 'यथा' ननन्दतुः, 'तथा तत्समौ' ताभ्याम् उमावृषाङ्काभ्यां शचीपुरन्दराभ्यां च समौ समानौ 'सा मागधी नृपश्च तत्सदृशेन' ताभ्यां कुमारजयन्ताभ्यां सदृशेन 'सुतेन' ननन्दतुः। मागधी प्राक् व्याख्याता ॥ २३ ॥

যেমন উমা এবং মহাদেব কার্ত্তিকেয় হইতে, শচী এবং ইন্দ্র জয়ন্ত হইতে, আনন্দ অনুভব করিয়াছিলেন, তেমনই উমা ও শচীর তুল্য মাগধী, এবং মহাদেব ও ইন্দ্রের তুল্য রাজা, কার্ত্তিকেয় ও জয়ন্তের তুল্য সেই পুত্র হইতে আনন্দলাভ করিলেন ।২৩।

As Uma and Siva with Kartikeya, or as Sachi and Indra with Jayanta, so the princess of Magadha and the king the equal of these (divine pairs) were pleased with their child the equal of these (divine boys.) (23).

Miscellaneous Notes.

1. उमावृषाङ्कौ—वृषः अङ्कः चिह्नं यस्य स वृषाङ्कः शिवः [See note on वृषभध्वज II. 37], उमा पार्वती च वृषाङ्कश्च उमावृषाङ्कौ। When पार्वती determined to practise penance with a view to obtain S'iva for husband, मेनका her mother tried to dissuade her. So great was the emotion of मेनका that she could only pronounce the two syllables उ मा meaning 'oh ! don't' [उ is सम्बोधने and मा is prohibitive]. Thence-forth पार्वती received the name उमा। [तपसा शिवं पतित्वेन लब्धुं कृतनिश्चया गौरी मात्रा "उ मा" इति तपसो निषिद्धासीत्। ततश्च तस्या उमेति प्रसिद्धं जातं नाम] Compare 'उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम'—*Kumāra.*

2. शरजन्मना—शरे शरवणे जन्म यस्य स शरजन्मा कार्त्तिकेयः तेन। हेतौ तृतीया।

3. जयन्तेन—जयन्तः इन्द्रपुत्रः, तेन ; हेतौ तृतीया।

4. शचीपुरन्दरौ—शची इन्द्राणी च पुरन्दरः इन्द्रश्च शचीपुरन्दरौ।

5. ननन्दतुः—नन्द् + लिट् अतुस् [conj. I. 57] Here नृपः and मा are to be taken *jointly* as the nominative of ननन्दतुः, the च in मा च having the force of *and* (समुच्चय), Compare—

'तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ।'—I. 57.

6. तत्सदृशेन—समान इव पश्यति आभाति इत्यर्थः सदृशः (see note on सदृशौ: Sl. 10). Now see *Sanjivani.* Qualifies सुतेन which takes इत्थंभूते तृतीया । (See note 7).

7. तत्समौ—For *Samása* see *Sanjivani.* Both in this and in तत्सदृशेन the *samása* is तृतीयातत्पुरुषः by the rule 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः'—ऊनार्थ words and the words पूर्व, सदृश, सम, कलह, निपुण, मिश्र, and श्लक्ष्ण may be compounded in a तृतीयातत्पुरुष । Qualifies 'नृपः मा च' which, though not compounded, serves all the purposes of a द्वन्द्व compound ; and a द्वन्द्व with this वाक्य would give a compound word in the *dual*, as in रामः लक्ष्मणः च = रामलक्ष्मणौ, हंसः मयूरी च = हंसमयूर्यौ &c. Consequently तत्समौ is in the dual.

8. *Change of voice.*—...उमावृषाङ्काभ्यां...शचीपुरन्दराभ्यां...तत्समेन तथा मागध्या नृपेण च ननन्दे ।

रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत् प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत् तयोः परस्परस्योपरि पर्यचीयत ॥२४

Anvayabodhini.—'तयोः यत् प्रेम बभूव, तत्पर्यचीयत' [तयोः यः स्नेहः आसीत्, स तदानीं ववृधे]। किम्भूतं प्रेम ?—'परस्पराश्रयं' भावबन्धनं [दिलीपाश्रयं प्रेम सुदक्षिणायाम् आसीत सुदक्षिणाश्रयञ्च दिलीपे ; तच्च परस्परं प्रेम पुनः सुदक्षिणाया भावं दिलीपविषये बबन्ध, दिलीपस्य भावं सुदक्षिणाविषये एवंविधं यत् प्रेम तयोः अभूत तत् भूयोऽपि ववृधे]। ननु इतःपूर्वं तत् ... आसीत्, अधुना वृद्धि गतम् - 'रथाङ्गनाम्नोः इव (यत् प्रेम तत् बभूव, पर्यचीयत) [कथमन्यमिति ?—चक्रवाकदम्पत्योः परस्पराश्रयं प्रेम प्रसिद्धमेव ; तयोरपि दम्पत्योः तथाविधमेव परस्पराश्रयं प्रेम आसीत् ; तदपि पुनर्ववृधे]। ननु ... तत्, किमत्र चित्रं पुनः ?—'एकसुतेन विभक्तम् अपि (तत् पर्यचीयत)'[सुदक्षिणाया यत् प्रेम पूर्वं केवलं दिलीपे आसीत, तत् अधुना दिलीपे रघौ च विभक्तम् ...

द्वितीयस्यापि यत् देवतायां कुक्षिगतायाम् आसीत्, तत् अधुना कुक्षिगतायां रघौ च विभक्तम् ; एकाधारे स्थितं वस्तु आधारद्वये विभक्तं सत् अल्पाधारं भवति ; किन्तु अत्र एतद्विरुद्धं, यत् तयोः प्रेम तथा विभक्तमपि न केवलं न अल्पीयत, प्रत्युत पर्यचितमेव अभूत]।

Prose order.—रथाङ्गनाम्नोः (चक्रवाकयोः) इव तयोः भावबन्धनं (हृदयाकर्षकं) परस्पराश्रयं (अन्योन्यविषयं) यत् प्रेम (स्नेहः वस्तु) बभूव (आसीत्) तत् एकसुतेन (केवलतनयेन तनयान्तरेणान्येन वा) विभक्तं (कृतविभागं) अपि परस्परस्य (अन्योन्यस्य) उपरि (विषये) पर्यचीयत (ववृधे) —*Mallinātha.* Or thus तयोः परस्पराश्रयं यत् प्रेम रथाङ्गनाम्नोः इव भावबन्धनं बभूव &c. as before.

Sanjivani.—रथाङ्गेति। रथाङ्गनाम्नी च रथाङ्गनामा च 'रथाङ्गनामानौ' चक्रवाकौ ["पुमान् स्त्रिया" इत्येकशेषः] तयोः 'इव तयोः' दम्पत्योः 'भावबन्धनं' हृदयाकर्षकं 'परस्पराश्रयम्' अन्योन्यविषयं 'यत् प्रेम बभूव तत् एकेन' केवलेन, तादृशाम् अन्येन वा ["एके मुख्यान्यकेवलाः" इत्यमरः], 'सुतेन विभक्तम् अपि' कृतविभागम् अपि 'परस्परस्योपरि पर्यचीयत' ववृधे [कर्मकर्तरि लङ्]; अविभक्तत्वात् स्वयमेव पर्यचितम् इत्यर्थः. [यदेकाधारं वस्तु, तदाधारद्वये विभक्तमल्पं भवति, अत्र तु तयोः प्रतिदैवकर्तृकत्वेनैकविषयं प्रेम सुते द्वितीयविषयत्वेऽपि नाहीयत, प्रत्युतोपचितमेवाभूत् इति भावः] ॥ २४ ॥

চক্রবাকদ্বয়ের ন্যায় তাঁহাদের পরস্পরের, পরস্পরের প্রতি, যে হৃদয়াকর্ষক স্নেহ ছিল, একটি পুত্র একণে তাহার ভাগ গ্রহণ করাতে তাহা পরস্পরের প্রতি প্রগাঢ়তর হইল। ২৪।

Their mutual love, steadying their affection (attracting their heart) as in a pair of Chakravākas, though shared by a boy, grew more towards each other. [Also see note 4]. (24).

Miscellaneous Notes.

1. रथाङ्गनाम्नोः—रथस्य अङ्गं रथाङ्गं चक्रम् ; रथाङ्ग नाम यस्य सः रथाङ्गनामा चक्रवाकः। Now see *Sanjīvanī.*

2. भावबन्धनम्—भावो बध्यते अनेन इति भाव + बन्ध + ल्युट् करणे = भावबन्धनम्। *Mallinātha* takes भाव in the sense of हृदय। I have not been able to trace this meaning to any Lexicon. We may take भाव in the sense of चेष्टरचेत् हृदा मनोहरः ; 'विकारो मानसो भावः' इत्यमरः। Raghunātha remarks "भावः ... भावः। भावयति अभिप्रायम् (इति भू + णिच् + अच् कर्तरि) ; तदुक्तम् '...'

नयमन्यस्माद्भावयन्ति रसान् यतः। तस्माद्भावा अमी प्रोक्ताः स्थायिसञ्चारिसात्त्विकाः इति।" Here we of course take the चित्तविकार caused by it (काम)। The poet himself uses भाव distinctly in this sense in another place. Thus—

'तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ॥'—*Kumára.*

Hence भावः, स्नेहरसेन कृतो मानसो विकारः, बध्यते अनेन इति भावबन्धः that which fixes or steadies affection. Qualifies प्रेम।

3. प्रेम—Nom. singular of प्रेमन् love.

4. बभूव—Existed भू+लिट् अ if, we follow *Mallinátha.* The love, steadying their affection as in a pair of Chakravákas which existed between them &c. If we take the alternative prose order—'Became or was' भू or अस्+लिट् अ। The love which, as in a pair of Chakravákas, *became* (or was) the cause of steadying their affection for each other &c.

5. परस्पराश्रयम्—पर परः = परस्पर. ; परस्परः आश्रयः विषयः यस्य तत् परस्पराश्रयम्—an irregular compound [See note on परस्पराविरुद्धम् I. 40]. Qualifies प्रेम। परस्पराश्रयं प्रेम = Love of which the *object* was each of the other. Note the exact meaning of आश्रय here. आश्रयति एतम् इति आ+श्रि+अच् कर्मणि = आश्रयः पात्रम् *object.* Sudakshiná loved *Dilípa i. e.* the आश्रय of Sudakshiná's love was *Dilípa.*

6. एकसुतेन—एकः द्वितीयरहितः सुतः, तेन। The alternative meaning given by *Mallinátha* is एकः ताभ्यां भिन्नः सुतः एकसुतः तेन in this construction एकसुतेन विभक्तम् means—Shared by another person—their child.

7. परस्परम्—परस्य परस्य इति परस्परम् [See I. 40] 'षष्ठी चानादरे' इति 'अपहि'मध्येति षष्ठी। See note 8.

8. अपहि—ऊर्ध्वं+हिन in the sense of अभ्यहित = उप+हि ... निपातनात्—'अभ्यहितेऽर्थे कर्तृस्थस्य ...' इति च प्रमाणः। Here the ... has the meaning (...) of अभ्यहित *i. e.* of बहुमान ; so we get षष्ठी in connection with it.

9. पर्य्यचीयत—परि+चि+लङ् त कर्म्मकर्त्तरि [लट् चिनोति—चिनुते, लोट् चिनोतु—चिनुताम्, लङ् अचिनोत्—अचिनुत, विधिलिङ् चिनुयात्—चिन्वीत, लिट् चिकाय—चिचाय—चिक्ये—चिच्ये, लुङ् अचैषीत्—अचेष्ट]।

10. *Change of voice.*—...भाववन्धनेन परस्पराश्रयिणा येन प्रेम्णा बभूवे, तेन विभक्तेन...पर्य्यचीयत (भावे)।

उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम्।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥२५॥

Anvayabodhini.—'सः अर्भकः तेन पितुः मुदं ततान' [स बालकः तेन स्वकीयेन कार्य्येण जनकम् आनन्दयामास]। तेन केन?—'धात्र्या प्रथमोदितं वचः उवाच (इति यत् तेन)' [उपमात्रा यत् वचः प्रथमम् उच्चारितं, स बालकः तस्य पुनरुच्चारणं चकार, तेन पिता तुतुषे]। पुनः केन?—'तदीयाम् अङ्गुलिम् अवलम्ब्य ययौ च (इति यत्, तेन)' [गमनशिक्षार्थम् उपमात्रा उपदिष्टः स तस्या अङ्गुलिम् अवलम्ब्य कतिचित् पदानि ययौ, तेन च पिता तुतुषे]। पुनरपि केन?—'प्रणिपातशिक्षया नम्रः अभूत् च (इति यत्, तेन)' [धात्री नमस्कारपात्रं तस्मै बालाय निर्द्दिश्य प्रणामम् उपदिष्टवती स एवमुपदिष्टः सन् नतशिराः अभूत्, तेनापि च पिता तुतुषे]।

Prose order.—सः अर्भकः (बालः) धात्र्या (उपमात्रा) प्रथमोदितं (पूर्व्वनिर्द्दिष्टं) वचः (वाक्यं) उवाच (उच्चारयामास) तदीयां (तस्याः) अङ्गुलिम् अवलम्ब्य (आश्रित्य) ययौ (चचाल) च प्रणिपातशिक्षया (प्रणामोपदेशेन) नम्रः (नतशिराः) अभूत् (बभूव) च (इति यत्) तेन पितुः (जनकस्य) मुदं (प्रीतिं) ततान (वर्द्धयामास)।

Sanjivani.—उवाचेति। 'स अर्भकः' शिशुः ["पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" इत्यमरः] 'धात्र्या' उपमात्रा ["धात्री जनन्यामलकी वसुमत्युपमातृषु" इति विश्वः] 'प्रथमम् उदितम्' उपदिष्टं 'वचः उवाच, तदीयाम् अङ्गुलिम् अवलम्ब्य ययौ च, प्रणिपातस्य शिक्षया' उपदेशेन 'नम्रः अभूत् च,' इति यत् 'तेन पितुः मुदं ततान' ॥ २५ ॥

ধাত্রী প্রথমে যে কথাটি বলিত সেই বালক তাহার আবৃত্তি করিত, ধাত্রীর অঙ্গুলি ধরিয়া চলিত, প্রণাম করিতে কহিলে অবনত হইত, তাহাতে পিতার আনন্দ হইত। ২৫।

The boy repeated the word first uttered by the nurse, w

holding her finger, and stooped under instruction to bow, by all this he promoted the joy of his father. (25).

Miscellaneous Notes.

1. धात्र्या— By the nurse अनुक्ते कर्तरि तृतीया । कर्त्ता of the क्रिया in प्रथमोदितम् ।

2. प्रथमोदितम्—सह्सुपा समास । See *Sanjīvani.* First uttered by the nurse, and then repeated by the boy. Qualifies वच ।

3. वच:—Accusative of उवाच । *Q.* Do you see any tautology in वच: उवाच ? *Ans.* No. For वच is qualified here—प्रथमोदितं वच उवाच । cf.—'गर्जितमिता नामनीचदष्थता:' - Magha.

4. ययौ—Took a few steps. या + लिट् अ [conj. II. 67].

5. तदीयाम्—तस्या इयम् तदीया, ताम । Qualifies अङ्गुलिम् ।

6. अवलम्ब्य—Having got a hold of अव + लम्ब + ल्यप् ।

7. अङ्गुलिम्—The nurse with a view to teach him to walk, held out a finger to him, and, supported by it, he took a few steps.

8. अभूत्—Became भू + लुङ् द (conj. II. 5)

9. नम्र: अभूत्—Bent himself.

10. प्रणिपातशिक्षया—प्रणिपतन प्रणिपात भावे घञ् ; प्रणिपातस्य प्रकारक शिक्षा, धात्र्या उपदेश, प्रणिपातशिक्षा Instructions to do obeisance. तया हेतौ तृतीया ।

11. *Remark.* The nurse's course is progressive. She first teaches him to speak simple words ; then she makes him take a few steps with the support of her finger ; having taught him thus to walk, she teaches to bow to superiors—a more complicated lesson.

12. तेन—करणे By that, तृतीया । This refers separately to the three action mentioned above *i. e.* to the boy's speaking, to his walking, and to his making a bow. *Each* of these actions separately gave the king joy. It was not necessary for h[illegible]y that these actions should all take place together. [illegible] the reference being *Separate,* we get तेन in the singular, [illegible] तै: in the plural. Compare इदम् in—

[illegible]
[illegible]
[illegible]
[illegible] ।"—*Rasagangâdhara.*

Also see note on I. 60.

13. [illegible]—Enhanced [illegible] + णिच् क्त ([illegible]) ।

14. वर्धकः—Lit. He who *grows* (See note on वर्धक: III. 21). Refers to the boy. The choice of the name is happy, when the *growth* of the prince is being described.

15. *Change of voice.*—...तेन वर्धकेन—रुचे...ययै...[illegible]... भूत् तेने ।

तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि ।
उपान्तसंमीलितलोचनो नृपश्चिरात् सुतस्पर्शरसज्ञतां ययौ ॥२६॥

Anvayabodhini.—'नृपः चिरात् सुतस्पर्शरसज्ञतां ययौ' [महता कालेन स राजा पुत्रस्य गात्रसंस्पर्शात् जाता प्रीतिं लेभे]। किम्भूतो राजा सुतस्पर्शसुखम् अनुभवन् ?—'उपान्तसंमीलितलोचनः (नृपः)' [स्पर्शेन जातात् अनिर्वचनीयात् आनन्दात् तस्य नेत्रे प्रान्तयोर्निमीलिते, तद्दर्शनेनैव ज्ञायते, स सुतस्पर्शं किमपि द्रव्यमनन्यत]। किं कृत्वा स नेत्रे निमिमील ?—'तम् अङ्कम् आरोप्य' [तं बालं रघुं क्रोडे कृत्वा]। क्रोडे करणादेव तस्य लोचने निमीलिते इत्यादर्थमेतत्, तदनुचित किम्भूतं तम्—'त्वचि अमृतं निषिञ्चन्तम् इव (तम् अङ्कम् आरोप्य)' [देहे अमृतरसस्य सेचनं कुर्वन्तमिव तं बालं क्रोडे कृत्वा स आनन्दात् लोचने निमिमील]। कथमसौ तं निषिञ्चन्तमिव इत्युच्यते ?—'शरीरयोगजैः सुखैः' [बालशरीरेण नृपशरीरस्य यो योगः अङ्के करणात् जातः, तेन एतावत् अस्य राज्ञः सुखं जातं यत् स अमृतेन आत्मानं सिक्तमिव मेने, सुखातिशयात् तस्य नेत्रे च निमीलिते]।

Prose order.—शरीरयोगजैः (गात्रसंस्पर्शसम्भूतैः) सुखैः (आनन्दैः) त्वचि (चर्मणि) अमृतं (सुधारसं) निषिञ्चन्तं (वर्षन्तं) इव तम् अङ्कं (क्रोडं) आरोप्य (प्रापय्य) उपान्तसंमीलितलोचनः (निमीलितनयनकोणः) नृपः (राजा) चिरात् (महता कालेन) सुतस्पर्शरसज्ञतां (पुत्राङ्गस्पर्शास्वादज्ञतां) ययौ (प्राप)

Mallinátha. Or त्वचि अमृतं निषिञ्चन्तम् इव तम् (अर्भकम्) अङ्कम् आरोप्य शरीरयोगजैः सुखैः उपान्तसंमीलितलोचनः (सन्), नृपः चिरात् सुतस्पर्शरसज्ञतां ययौ।

Sanjivani.—तमिति। 'शरीरयोगजैः सुखैः त्वचि' त्वगिन्द्रिये 'अमृतं निषिञ्चन्त' वर्षन्तम् 'इव तं' पुत्रम् 'अङ्कम् आरोप्य' मुदाविर्भावात् 'उपान्तयोः संमीलितलोचन' सन् 'नृपः चिरात् सुतस्पर्शरसज्ञतां ययौ।' रसः स्वादः॥ २६॥

তাহাকে ক্রোড়ে করিয়া বহুকালে রাজা সুতস্পর্শের আনন্দ অনুভব করিলেন; স্পর্শসুখে মনে করিলেন গাত্রে অমৃত বর্ষণ হইতেছে, তাঁহার নেত্রদ্বয় প্রান্তে নিমীলিত হইয়া গেল। ২৬।

Him, sprinkling ambrosia on the skin as it were by pleasure from bodily contact, having placed on his lap, the king, his eyes closed at the corner, at length knew the taste of the touch of a son. *Or.*—Him, sprinkling ...were, having placed...corners with pleasure from bodily contact, at length...son]. (26)

Miscellaneous Notes.

1. तम्—अणिकर्त्ता of आरोप्य has become कर्म in the णिजन्तावस्था. Refers to अर्भक of Sl. 25.

2. अङ्कम्—क्रोडम् lap; कर्म of आरोप्य।

3. आरोप्य—आ + रुह + णिच् (= आरोहि or आरोपि) + ल्यप्; णिलोपः। The root being गत्यर्थ, the अणिकर्त्ता takes कर्मसंज्ञा। Thus सः अङ्कम् आरोहति (अणिजन्तकाले); नृपः तम् (अणिकर्तुः कर्मसंज्ञा) अङ्कम् आरोपयति (णिजन्तकाले)।

4. शरीरयोगजैः—शरीरयोः नृपस्य तस्य च योगः शरीरयोगः; शरीरयोगात् जायन्ते इति शरीरयोग + जन + ड कर्त्तरि = शरीरयोगजानि; तैः। Qualifies सुखैः।

5. सुखैः करणे तृतीया or, धार्मिक धनवान् इत्यादिवत् अभेदे तृतीया अभेदेन सुखं एव अमृतं विवक्षया सुखैः अमृतं निषिञ्चन् इव। In the alternative construction हेतौ तृतीया।

6. निषिञ्चन्तम्—नि + सिच + शतृ = निषिञ्चन् इव। Qualifies तम्।

7 उपान्तसंमीलितलोचन—उपस्थितः अन्तः ययोः, or समीपस्थौ अन्तौ उपान्तौ, अन्तसमीपवर्त्तौ भागौ; संमीलिते लोचने यस्य सः संमीलितलोचनः

ow see *Sanjivani* Qualifies नृपः। Half-closed eyes are supposed to indicate extreme pleasure. Compare—

'शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः।'—*Kumára*,

8. चिरात्—After a long time. An अव्यय।

9. सुतस्पर्शरसज्ञताम्—सुतस्य स्पर्शः सुतस्पर्शः ; सुतस्पर्शस्य रसः स्वादः सुतस्पर्शरसः ; तं जानातीति सुतस्पर्शरस + ज्ञा + क कर्तरि = सुतस्पर्शरसज्ञः ; or जानातीति ज्ञा + क कर्तरि = ज्ञः ; सुतस्पर्शरसस्य ज्ञः सुतस्पर्शरसज्ञः ; तस्य भावः सुतस्पर्शरसज्ञता ; ताम्। Accusative of ययौ।

10. ययौ—प्राप। या + लिट् ण [conj. II. 67]. Verbs meaning 'to go' also mean 'to attain'. Compare 'गमिष्याम्युपहास्यताम्' I. 2.

11. *Change of voice.*—...उपान्तसंमीलितलोचनेन (सता) नृपेण...सुतस्पर्शरसज्ञता यये।

12. *Remark.*—The following S'loka is to a certain extent parallel in sense to S'lokas 25—26 :—

'आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति॥'—*Sakuntala.*

अमंस्त चानेन पराध्यर्जन्मना स्थितेरभेत्ता स्थितिमन्तमन्वयम्।
स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः॥२७॥

Anvayabodhini.—'अनेन अन्वयं स्थितिमन्तम् अमंस्त च' [न केवलं स्पर्शसुखमेव अन्वभूत, अनेन रघुणा मे वंशः प्रतिष्ठावान् जातः, इत्यपि च स नृपः मेने]। किंभूतेन अनेन स एवं मेने?—'पराध्यर्जन्मना' [अतिप्रकृष्टं जन्म यस्य तथाविधेन तेन स एवं मेने]। शास्त्रोक्तकर्मानुष्ठानादिभिर्या प्रतिष्ठा तस्य वंशस्य जाता, सा अधुना चलिताऽपि न भविष्यति, वृद्धिमापि [illegible] एवमपि मेने, [illegible] किंभूतश्चासौ ?—'स्थितेः अभेत्ता (नृपः, सन्)' [मर्यादापालकः सन्. [illegible] यो भावः सर्वं जानाति स्म, स्वस्यापि च यथा मर्यादा पालयन्। [illegible] 'स्वान्वैरपि मनुप्रभृतिभिः या मर्यादापि कृता स्थितिर्निर्धारिता, [illegible] नैव चलिष्यते, वंशस्य कर्ता ये ते प्राक् मन्विन्द्राः प्रार्थिताः, ते [illegible] तदुपलक्षणं किमिव मनुते—'प्रजानां पतिः स्वमूर्तिभेदेन [illegible] [प्रजापतिः ब्रह्मा स्वस्यैव मूर्तिभेदेन देहेन [illegible] प्रजानां पतिः सोऽपि स्वस्यैव पुत्ररूपेण मूर्तिभेदेन [illegible]

समुद्रम् इव (लिपेः ग्रहणेन वाङ्मयम् आविशत्)' [यथा नदीमुखम् आश्रित्य मत्स्यादयः समुद्रम् आविशन्ति, तथा सोऽपि लिपेर्ग्रहणमवलम्ब्य वाङ्मयम् आविशत्।

Prose order.—वृत्तचूलः (निष्पन्नचूडाकर्मा) सः चलकाकपक्षैः (चञ्चलशिखण्डकैः) सवयोभिः (स्निग्धैः) अमात्यपुत्रैः (मन्त्रितनयैः) अन्वितः (सहितः सन्) लिपेः (वर्णमालायाः) यथावद्ग्रहणेन (सम्यग्बोधेन) वाङ्मयं (शब्दजातं) नदीमुखेन (सिन्धुद्वारेण) समुद्रं (सागरम्) इव आविशत् (प्रविष्टः)।

Sanjivani.—स इति। "चूडा कार्या द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्या श्रुतिचोदनात्॥" इति मनुस्मरणात्] तृतीये वर्षे 'वृत्तचूलः' निष्पन्नचूडाकर्मा सन् [डलयोरभेदः] 'सः' रघुः ["प्राप्ते तु पञ्चमे वर्षे विद्यारम्भञ्च कारयेत्" इति वचनात्] पञ्चमे वर्षे 'चलकाकपक्षैः' चञ्चलशिखण्डकैः ["बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डकः" इति हलायुधः] 'सवयोभिः' स्निग्धैः ["स्निग्धो वयस्यः सवयाः" इत्यमरः] 'अमात्यपुत्रैः अन्वितः' सन् 'लिपेः' पञ्चाशद्वर्णात्मिकायाः मातृकायाः 'यथावद्ग्रहणेन' सम्यग्बोधेन उपायभूतेन 'वाङ्मयं' शब्दजातं, 'नद्याः मुखं' द्वारम् ["मुखं तु वदने मुख्यारम्भे द्वाराभ्युपाययोः" इति यादवः] तेन यथा मकरादिः 'समुद्रम् इव आविशत्' प्रविष्टः। शास्त्राणि [illegible] ॥ २८ ॥

[illegible] নদীমুখে সমুদ্রে প্রবেশের ন্যায় শব্দশাস্ত্রে তাঁহার প্রবেশ হইল ।২৮।

With tonsure performed, accompanied by friendly children of ministers with waving locks, he, by proper mastery of the alphabet, entered the region of words like the sea by the mouth of a river. (28)

Miscellaneous Notes

1. वृत्तचूलः—वृत्ता निष्पन्ना चूडा यस्य सः वृत्तचूडः, and changing the ड to ल (which is often done) we get वृत्तचूलः। ड is here changed to ल for the sake of alliteration with चल। Compare '[illegible]' IX. 46. Here '[illegible]' is substituted for '[illegible]'.

'ब्रह्मत्वे सृजते लोकान् विष्णुत्वे पालयत्यपि ।
रुद्रत्वे संहरत्येव तिस्रोऽवस्थाः स्वयम्भुवः ॥'

It should be noticed that Raghu also was सम्पूर्तिभेद of Dilipa For it is said that the husband enters the womb of the wife. And is born as the son.

9. गुणाग्रवर्त्तिना—अग्रे भवम् इति अग्र + यत् अग्र्यम् ; गुणेषु अग्र्यं गुणाग्र्यं सत्त्वं, तदाख्यो गुण इत्यर्थः ; गुणाग्र्येण वर्त्तितुं शीलमस्य इति गुणाग्र्य + वृत + णिनि कर्त्तरि = गुणाग्रवर्त्ती—He whose wont is to work with the best of the three *Gunas* सत्त्व, रज and तमः ; तेन । Qualifies सम्पूर्तिभेदेन । This also applies to रघु । Thus अग्रे भवा अग्र्या मुख्याः श्रेष्ठाः ; अग्र्येषु वर्त्तितुं शीलमस्य इति अग्र्य + वृत + णिनि कर्त्तरि = अग्र्यवर्त्ती—He who is always among the best ; गुणैः विद्याविनयादिभिः अग्र्यवर्त्ती गुणाग्र्यवर्त्ती; तेन ।

10. पतिः प्रजानाम्—For प्रजापतिः । The words are purposely left uncompounded ; for if compounded, प्रजापतिः being a संज्ञा would apply only to ब्रह्मा ; but uncompounded, प्रजानां पतिः applies both to the king दिलीप, and to ब्रह्मा ।

11. *Change of voice.*—...अभेवा (नृपेण)...अन्वयः...पत्या...सर्ग... स्थितिमान् अमानि ।

स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।
लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥२८॥

Anvayabodhini.—'स वाङ्मयम् आविशत्' [सः अशेषाणां शब्दानाम् आकरं व्याकरणम्, अभिधानञ्च, अशिक्षत]। केन उपायेन स तत् अशिक्षत ?—'लिपेः यथावद्ग्रहणेन' [स आदौ पञ्चाशद्वर्णात्मिका मातृका वर्णमाला सम्यक् अशिक्षत, ततः ताम् आश्रित्य व्याकरणाभिधानानि शब्दशासनानि अधीतवान्]। किम्भूतः सन् स वाङ्मयम् आविशत् ?—'वृत्तचूलः (सन्)' [तृतीये वर्षे चूडाकर्मणि निष्पन्ने सति, पञ्चमे वर्षे यथाशास्त्रं वर्णमालामधीत्य शब्दजातमशिक्षत]। पुनः किम्भूतः सन्—'चलकाकपक्षकैः सवयोभिः अमात्यपुत्रैः अन्वितः (सन्)' [मन्त्रिणां पुत्रैः समेतः सन् ; सर्वएव ते मन्त्रितनयाः वयसा रघुणा तुल्याः ; रघोस्तेषां च, ... इतःपूर्वं निष्पन्ने सति, सर्वेषामेव शिखा यद्रा आसन् ; ते च बाल... चञ्चलाभिः शिखाभि शुशुभिरे]। किमिव एतत् ?—'नदीमुखेन

12. वस्तूपहिता—उप + धा + क्त कर्मणि = उपहिता विहिता rendered, bestowed; वस्तुनि उत्कृष्टे वस्तुनि उपहिता वस्तूपहिता।

13. प्रसीदति—प्र + सद + लट् ति = प्रसीदति [conj. I. 89].

14. क्रिया हि वस्तूपहिता प्रसीदति—Enterprise undertaken with good materials is always a success. A familiar quotation.

15. *Change of voice.*—उपनीतः गुरुप्रिय एषः विपश्चिद्भिः गुरुभिः विनिन्ये; तैः अवन्ध्ययत्नैः च बभूवे। क्रिया वस्तूपहितया प्रसद्यते।

धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः।
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः॥३०॥

Anvayabodhini.—ब्रूहि कीदृशी तस्य पात्रता, यत्, गुरवः तस्य प्रिया जाताः, स च गुरूणां प्रियो भूत्वा तेषां श्रमं सफलं चकार?—'स धियः समग्रैः गुणैः विद्याः ततार' [शुश्रूषाश्रवणादिभिः सर्वैरेव धीगुणैः समन्वितः स, स्वल्पेनैव कालेन वेदप्रभृतीः विद्याः अशिक्षत]। काः काः विद्याः ततार? एकां, द्वे वा?—'चतुरर्णवोपमाः चतस्रः (विद्याः) क्रमात् (ततार)' [एका, द्वे इति किमुच्यते भवता? सः अपाराः सागरसदृशीश्चतस्र एव विद्याः अधीतवान्]। अहो धीमत्ता तस्य, प्रभावश्च धीगुणानां, यत् तेन चतस्रोऽपि विद्याः अधिगताः। तद्ब्रूहि किम्भूतः सः, किम्भूता वा धीगुणाः?—'उदारधीः (सः) पवनातिपातिभिः (धियः गुणैः विद्याः ततार)' [सत्यं महत्य एव ता विद्याः, स तु पुनः सर्वगुणयुतया धिया उपपन्नः, ते गुणाश्च पवनमपि अतीत्य प्रसरन्ति; अतो नाश्चर्यं यत् स्वल्पेनैव कालेन ताः सर्वाः विद्याः तेन अधिगताः] कः काः इव सः ताः विद्याः ततार?—'हरिताम् ईश्वरः हरिद्भिः दिशः इव' [यथा हरिताम् ईश्वरः सूर्यः, हरिद्भिः अश्वैः अपाराः चतस्रो दिशः स्वल्पेनैव कालेन तरति, तथा उदारया धिया अधिकारी सोऽपि, धियो गुणैः, अपाराः चतस्रो विद्याः स्वल्पेनैव कालेन ततार]।

Prose order.—उदारधीः (उत्कृष्टबुद्धिः) सः समग्रैः (सकलैः) धियः (बुद्धेः) गुणैः (प्रकर्षैः) चतुरर्णवोपमाः (सागरचतुष्टयसन्निभाः) चतस्रः विद्याः हरिताम् (दिशाम्) ईश्वरः (स्वामी) पवनातिपातिभिः (वातातिगैः) हरिद्भिः (अश्वैः) दिशः (आकाशावकाशान्) इव क्रमात् (यथाक्रमं) ततार (तीर्णः)।

Sanjivani.—धिय इति। [अत्र कामन्दकः "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा। ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥" इति "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती। एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः॥" इति

cannot compound the words *separately*, first compounding चतुर् and अर्णव, and then चतुरर्णव and उपम। The भाष्य is very plain on this point—'इह द्वौ पक्षौ, वृत्तिपक्षश्च अवृत्तिपक्षश्च ; यदा वृत्तिपक्षः, तदा सर्वेषामेव वृत्तिः ; यदा अवृत्तिपक्षः, तदा सर्वेषाम् अवृत्तिः।'

5. ततार—Went through, mastered. Literally *crossed*. तॄ + लिट् अ [लट् तरति, लोट् तरतु, लङ् अतरत्, विधिलिङ् तरेत्, लुङ् अतारीत्]।

6. विद्याः—The Sciences. Four sciences are mentioned in the *Saraswati*.—(1) आन्वीक्षिकी Logic and Metaphysics, (2) त्रयी The Vedas (3) वार्ता Law and the *Puranas*, (4) दण्डनीतिः Polity.

7. पवनातिपातिभिः—पवनं वायुम् अति अतीत्य पतितुं शीलमेषाम् इति पवन+अति+पत+णिनि कर्तरि=पवनातिपातिनः, तैः। Qualifies हरिभिः as well as गुणैः। The intellect धी of many, quickly penetrates regions where the wind cannot reach ; so the qualities of intellect [धीगुणाः may be supposed quicker than *wind*. Again the sun apparently describes a circle of a radius of 94 millions of miles in 24 hours, and hence is much faster than the fastest wind.

8. *Remark.—Raghu* is here compared to the *Sun*, and by virtue of the comparison it follows that, as the sun progresses, lighting up the dark regions of the earth, so Raghu proceeded through the different Sciences, lighting up many an obscure point by his keen intellect. Again the धीगुणाः are compared to the horses of the sun. धीगुणाः carried Raghu on through the four Sciences, as the horses carry the sun on through the four quarters. Now the sun has *seven* horses in his chariot, so it is better to count धीगुणाः as *seven* in number, and *not* eight.

9. *Change of voice.*—...उदारधिया तेन...सूर्येणेव...तेरिरे।

त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मन्त्रवत्।
न केवलं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ॥३१॥

Anvayabodhini—ननु रविवत् सर्वसमृद्धा चतुर्विद्या पुत्रेण इत्या-

lopment are referred to in the first line—(1) वत्सता, (2) वत्सतरता, (3) उक्षता, (4) महोक्षता, the last being the final stage.

द्विपेन्द्रभावम्—द्वाभ्यां पिबति इति द्विपः ; द्विपानामिन्द्रः श्रेष्ठतया राजा or द्विपेषु इन्द्रः श्रेष्ठतया श्रेष्ठः, or द्विपोऽयम् इन्द्र इव इति द्विपेन्द्रः (See note on द्विपेन्द्रः II. 8) ; द्विपेन्द्रस्य भावः द्विपेन्द्रभावः ; तम् ।

4. कलभः—A young elephant.

5. क्रमात्—By stages. compare note 2. हेतौ पञ्चमी । See note on क्रमात्, Sl. 30.

6. यौवनभिन्नशैशवः—शिशोर्भावः शैशवं बाल्यम् ; भिन्नं दारितं तिरोभावितं शैशवं यस्य सः भिन्नशैशवः ; यौवनेन कर्त्रा भिन्नशैशवः यौवनभिन्नशैशवः । Qualifies रघुः ।

7. पुपोष—Cherished, bore : पुष + लिट् ण [conj. III. 22].

8. गाम्भीर्यमनोहरम्—गम्भीर means *deep*. गम्भीरे भवम् इति गम्भीर + ष्यञ् = गाम्भीर्यम् that which is found in deep water, *i. e.* stillness and an awe-inspiring majesty. मनो हरतीति मनस् + हृ + अच् कर्तरि by the rule 'हरतेः अनुद्यमने अच्'—The root हृ takes अच् with a कर्मोपपद when it does not imply *lifting*. Thus मनोहर, अंशहर &c. But if implying *lifting* compare भारहारः with the affix अण् । गाम्भीर्येण मनोहरं गाम्भीर्यमनोहरम् : तत् Qualifies वपुः ।

9. *Change of voice.*—...रघुणा......यौवनभिन्नशैशवेन (सता)...स्पृशता वत्सतरेण...श्रयता कलभेन.. पुपुषे

10. *Remark.*—The reading गम्भीरमनोहरं वपुः is better. Mallinátha's reading and interpretation are open to the following objections—

(1) गाम्भीर्य inspires *awe* so cannot cause मनोहरत्व ।

(2) भिन्न has क्त in the *past* while स्पृशन् and श्रयन् have शतृ in the *present.* The simile is therefore defective. With the reading गम्भीरमनोहरं वपुः we explain as below—

'रघुः क्रमात् यौवनेन' दूरी भावेन सह 'भिन्नं' भिद्य 'शैशवं' शिशुभावं यस्य तथाविधः सन् 'महोक्षतां' महोक्षपदस्य 'स्पृशन्' गच्छन् न तु स्पृष्टः 'वत्सतरः' इव 'द्विपेन्द्रभावं' महागजत्वं 'श्रयन्' व्रजन् न तु श्रितः 'कलभः' करिपोतः 'इव गम्भीरं' महदन्तरम् अतएव अद्भुत 'मनोहरं सुन्दरम्' अतएव अभिरामं च 'वपुः'

lopment are referred to in the first line—(1) वत्सता, (2) वत्सतरता, (3) दम्यता, (4) महोक्षता, the last being the final stage.

द्विपेन्द्रभावम्—द्वाभ्यां पिबति इति द्विपः ; द्विपानामिन्द्रः षष्ठ्या राजा or द्विपेषु इन्द्रः सप्तम्या शौण्डः, or द्विपोऽयम् इन्द्र इव इति द्विपेन्द्रः (See note on द्विपेन्द्रः II. 8) ; द्विपेन्द्रस्य भावः द्विपेन्द्रभावः ; तम् ।

4. कलभः—A young elephant.

5. क्रमात्—By stages. compare note 2. हेतौ पञ्चमी। See note on क्रमात्, Sl. 30.

6. यौवनभिन्नशैशवः—शिशोर्भावः शैशवं बाल्यम् ; भिन्नं दारितं तिरोभावितं शैशवं यस्य सः भिन्नशैशवः ; यौवनेन कर्त्रा भिन्नशैशवः यौवनभिन्नशैशवः। Qualifies रघुः।

7. पुपोष—Cherished, bore ; पुष + लिट् ण [conj. III. 22].

8. गाम्भीर्यमनोहरम्—गम्भीर means *deep*. गम्भीरे भवम् इति गम्भीर + ष्यञ् = गाम्भीर्यम् that which is found in deep water, *i. e.* stillness and an awe-inspiring majesty. मनो हरतीति मनस् + हृ + अच् कर्तरि by the rule 'हरतेः अनुद्यमने अच्'—The root हृ takes अच् with a कर्मोपपद when it does not imply *lifting*. Thus मनोहर, अंशहर &c. But if implying *lifting* compare भारहारः with the affix अण्। गाम्भीर्येण मनोहरं गाम्भीर्यमनोहरम् ; तत Qualifies वपुः।

9. * *Change of voice.*—...रघुणा......यौवनभिन्नशैशवेन (सता)...महता वत्सतरेण...दम्यता कलभेन.. पुपुषे

10. *Remark.*—The reading गम्भीरमनोहरं वपुः is better. Mallinátha's reading and interpretation are open to the following objections—

(1) गाम्भीर्य inspires *awe* so cannot cause मनोहरत्व।

(2) भिन्न has क्त in the *past* while महन् and दम्यन् have शतृ in the *present*. The simile is therefore defective. With the reading गम्भीरमनोहरं वपुः we explain as below—

'रघुः क्रमात् यौवनेन' तृतीया भावेन सह 'भिन्नं' भिन्नं 'शैशवं' शिशुभावं यस्य तथाविधः सन् 'महोक्षतां' महावृषभत्वं 'महन्' गच्छन् न तु महतः 'वत्सतरः' दम्य 'इव द्विपेन्द्रभावं' महागजत्वं 'दम्यन्' गच्छन् न तु स्थितः 'कलभः' करिपोतः 'इव गम्भीरं' मदजलकम् अतएव अधृष्यं 'मनोहरं सुन्दरम् अतएव अभिगम्यं च'

[illegible] 'पुपोष' [illegible] । [illegible]

[illegible]

[illegible] ।

अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयद्गुरुः ।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ॥३३॥

Anvayabodhini. [illegible] रघौ राजा किं कृतम् ?—'अस्य [illegible] विवाहदीक्षां 'निरवर्तयत्' [अनन्तरं पिता दिलीपः, रघौ यौवनं प्राप्ते सति, [illegible] विवाहक्रियां सम्पादयामास]। कदा गोदाने [illegible] एव विवाहः ?—'गोदानविधेः अनन्तरम्' [गोदानाख्यं [illegible]]। ततः किम् ?—'नरेन्द्रकन्याः तं सत्पतिम् अवाप्य आबभुः' [सार्वभौमे राजनि दिलीपे [illegible] विवाहार्थम् उद्युक्ते सति, [illegible] नरेन्द्राः कन्याप्रदानाय [illegible] आसुः ; दिलीपोऽपि च तान् [illegible] मत्वा पुत्रेण रघुणा तासां कन्यकाः विवाहयामास ; ताः कन्यकाश्च सर्वसद्गुणोपेतं रघुं भर्त्तृत्वेन प्राप्य रेजुः]। [illegible] इव कमपरं प्राप्य ताः आबभुः ?—'दक्षसुताः तमोनुदम् (अवाप्य) इव' [[illegible] दक्षस्य प्रजापतेः कन्यकाः रोहिण्यादयः चन्द्रं भर्त्तृत्वेन अवाप्य आबभुः, तथा ताः [illegible] रघुं प्राप्य रेजिरे]।

Prose order.—अथ (अनन्तरं) गुरुः (पिता) अस्य गोदानविधेः (केशान्त-कर्मणः) अनन्तरं (पश्चात्) विवाहदीक्षां (दारग्रहणसंस्कारं) निरवर्त्तयत् (कृत-वान्)। नरेन्द्रकन्याः (राजकुमार्य्यः) तं दक्षसुताः (दक्षकन्यकाः) तमोनुदं (चन्द्रम्) इव सत्पतिं (श्लाघ्यभर्त्तारं) अवाप्य (लब्ध्वा) आबभुः (शुशुभिरे)।

Sanjivani.—अथेति । ["गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः । स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि । पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु" इति केशवः] गावः लोमानि केशाः दीयन्ते खण्ड्यन्ते अस्मिन्निति व्युत्पत्त्या गोदानं नाम ब्राह्मणादीनां षोड़शादिषु वर्षेषु कर्त्तव्यं केशान्ताख्यं कर्म्मोच्यते । तदुक्तं मनुना, "केशान्तः षोड़शे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥" इति] 'अथ गुरुः' पिता ("गुरुर्गीष्पतिपित्रादौ" इत्यमरः] 'अस्य गोदान-विधेः अनन्तरं विवाहदीक्षां निरवर्त्तयत्' कृतवान् इत्यर्थः । अथ 'नरेन्द्रकन्याः तं' 'दक्षस्य सुताः' रोहिण्यादयः 'तमोनुदं' चन्द्रम् 'इव' ["तमोनुदोऽग्निचन्द्रार्काः" विश्वः] 'सत्पतिम् अवाप्य आबभुः'। रघुरपि तमोनुत् । [अत्र सङ्]

लिङ् जयेत्, लिट् जिगाय, लुङ् अजैषीत्]। The author of the Ganadurpana remarks that जि is not used in the Imperative (लोट्) third person singular and plural. But compare 'जयतु जयतु भर्त्ता' Sakuntalá Act II; 'जयतु देव.' Ibid Act V. &c.

8. तथापि—Even thus. Indeclinable.

9. नीचैः—Small. Indeclinable.

10. विनयात्—Because of modesty. हेतौ पञ्चमी।

11. अदृश्यत—Looked. दृश् + लङ् त कर्मणि [conj. I. 24.]

12. *Change of voice.*—...युना युगव्यायतबाहुना अंसलेन कपाटवक्षः परिणद्धकन्धरेण रघुणा...गुरुः जैयत ....(तम्)...(लोकाः) अपश्यन्।

Remark.—This S'loka comes naturally after Sl. 32. and the proper place of S'loka 33 is immediately before Sl. 35. I suspect that S'lokas 33 and 34 some-how got interchanged in some old manuscript, and since then have been occupying each the other's place in later manuscripts. Let any one read first 'महोक्षतां वत्सतरः &c.,' then 'युवा युगव्यायतबाहुः &c.,' next 'अथास्य गोदान &c.' and last 'ततः प्रजानाम् &c.,' and the cogency of my remark will be obvious.

ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरम्।
निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्॥३५॥

Anvayabodhini.—मन्त्री वृद्धस्य राज्ञः राज्यशासने सहायतां कर्त्तुं स योग्योऽभूत्—'ततः नृपेण असौ युवराजशब्दभाक् चक्रे' [अनन्तरं तस्य गुणवत्तामालोच्य राजा दिलीपः तं यौवराज्येन अयोजयत्]। कस्तत्र हेतुरासीत्?—'(असौ) निसर्गसंस्कारविनीतः इति' [असौ रघुः प्रकृत्या विनीतः, शास्त्रादिशिक्षया च पुनः कृतविनयाधानः, इति हेतोः तं सत्पात्रं मत्वा, यौवराज्ये अभ्यषिचयत्]। आस्तां तावत् रघुर्योग्यः,नृपस्तु कथं स्वयं राज्यरक्षणे शिथिलप्रयत्नोऽभूत्?—'आत्मना चिरं धृतां प्रजानां नितान्तगुर्वीं धुरं लघयिष्यता (नृपेण युवराजशब्दभाक् चक्रे)' [वृद्धत्वमेवात्र कारणम्, नतु स राज्यरक्षणे पराङ्मुखः, प्रजानां गुरुः रक्षणभारः इयन्तं कालं तु अनेनैव धृतः; अधुना परिणते वयसि प्रयत्नातिशयस्य, क्लेशकरत्व

ास्य, लक्ष्मीः अंशतः युवराजसंज्ञितं रघुरूपं स्थानं प्राप]। एतत्तु श्रियः चापल-
मेव—'गुणाभिलाषिणी (श्रीः तत् आस्पदम् अगच्छत)' [कथं चापलमिति? गुणप्रिया
हि श्रीः, गुणिनो रघोः यदि सा गुणान् आद्रतवती, सा तस्याः सहृदयता एव, न
चापलम्]। भवतु तथापि तत् तस्या निन्दार्थे—'कमलात्, नवावतारम् उत्पलम् इव
श्रीः नरेन्द्रमूलायतनात् तत् आस्पदम् अगच्छत्)' [कमलं विकसितं सत् कतिचिदेव
दिनानि शोभते, ततः तस्मादेव उत्पन्नं कोरकं विकसति, श्रियाः च जनानानन्दयति;
चिरविकसितञ्च कमलं भ्रष्टलक्ष्मीकं भवति। श्रुिः अत्र कमलस्य परित्यागे, कोरकं
प्रति गमने च, को जनः श्रियं निन्दति, प्रत्युत सर्वं एव अभिनवस्य पद्मस्य श्रिया
मोदते। सापि दिलीपस्य आंशिकी श्रीहीनता रघोः श्रीमत्ता इत्यनेव जानीहि]।

Prose order.—गुणाभिलाषिणी (गुणान्वेषिणी) श्रीः (लक्ष्मीः) नरेन्द्रमूला-यतनात् (राजरूपप्रधानस्थानात) अनन्तर (सन्निहितं) युवराजसंज्ञितं (युवराज-पदोपलक्षितं) तदास्पदं (तत्स्थान) कमलात् (परिणतपद्मात्) नवावतारम् (अचि-रोत्पन्नं) उत्पलम् (कमलकोरकम्) इव अंशेन (एकविभागेन) अगच्छत् (अभजत)। —*Mallinátha.* Or thus—अनन्तरं गुणाभिलाषिणी श्रीः...तत् युवराज-संज्ञितम् आस्पदं &c.

Sanjivani.—नरेन्द्रेति। गुणान् विनयादीन् सौरभ्यादीन् च अभिलषतीति 'गुणाभिलाषिणी श्रीः' राज्यलक्ष्मीः पद्माश्रया च 'नरेन्द्रः', दिलीपः एव 'मूलायतनं' प्रधानस्थानं तस्मात् अपादानात् 'अनन्तरं' सन्निहितं युवराजः इति संज्ञा अस्य सञ्जाता 'युवराजसंज्ञितम्' [तारकादित्वात् इतच्प्रत्ययः] आत्मनः पदं स्थानम् 'आस्पदम्' [आस्पदं प्रतिष्ठायाम्" इति निपातः] सः रघुः इति आस्पदं 'तदास्पदं, कमलात्' चिरोत्पन्नात 'नवावतारम्' अचिरोत्पन्नम् 'उत्पलम् इव अंशेन अगच्छत्' स्त्रियो हि यूनि रज्यन्ते इति भावः॥ ३६॥

লক্ষ্মী, কমল হইতে নবজাত কমলকোরক গমনের ন্যায় নরেন্দ্ররূপ মূলস্থান হইতে সন্নিহিত যুবরাজনামক সেই স্থানে কিয়দংশ গমন করিলেন। (অথবা)—অনন্তর নরেন্দ্ররূপ মূলস্থান হইতে যুবরাজনামক সেই স্থানে, কমল হইতে নবজাত কমল-কোরকে সংক্রমণের ন্যায়, কিয়দংশে লক্ষ্মীর সংক্রমণ হইল। ৩৬।

Lakshmí, fond of excellence, went over in part to that seat named 'crown-prince' near her original seat—the old king, as from the full blown lotus to the newly appeared lotus bud. *Or*—Then Lakshmi...'crown-prince' from her original···bud. (36)

Miscellaneous Notes.

1. नरेन्द्रमूलायतनात्—आयं धनागमं तनोति इति आय + तन + क + कर्त्तरि

6 दध—अनुशीलने इतिकि कार्यार्थं सप्तमी ।

7. विधाः—वि+धा+लुङ् ; अट् the अट् being barred by the presence of the prohibitive particle मा by the rule 'न माङ्योगे'। The लुङ् is used because of the *Sûtra* 'माङि लुङ्' [conj. II. 43.]

8. पदव्याम्—पदवी footsteps, the course of life ; गतौ । औप-श्लेषिके आधारे सप्तमी ।

9 सगराः—The 60000 sons of Sagara a king of the Solar race, were all consumed by the fire of Kapila's wrath (see note on सगरम् I. २१. Indra means that as he is now imitating Kapila, he will destroy Raghu, as Kapila did the sons of Sagara in former times. [पुरा सगरः नृपः अश्वमेधस्य यागार्थं नीतम् इन्द्र ध्यानमग्नस्य मुनेः कपिलस्य समीपे ररक्ष । अश्वान्वेषणाय गतान् दुर्विनीतान् सगरसुतान् स च मुनिर्भस्मीचकार इति पौराणिकी कथा]।

10. *Change of voice.*—...त्वम् अश्वम् अमुम् अपहारितवान्...मिथ्यादि।

11. *Remark.*—Indra evidently sees the weekness of his argument, and consequently now tries to see if intimidation would make Raghu desist from the attempt.

ततः प्रहस्यापभयः पुरन्दरं पुनर्बभाषे तुरगस्य रक्षिता ।
गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ॥५१

Anvayabodhini.—'ततः तुरगस्य रक्षिता पुनः पुरन्दरं बभाषे' [इन्द्रस्य एतद्वचनं श्रुत्वा अश्वस्य रक्षकः रघुः पुनरपि तमुवाच]। रघुः किम्भूतः ?—'अपभयः' [भयेन रहितः ; इन्द्रस्तु कपिलदृष्टान्तं दर्शयित्वा अस्य भयोत्पादनार्थं चेष्टते स्म, ततः अभीत एव इन्द्रं प्रत्युवाच]। किं कृत्वा उवाच ?—'प्रहस्य' [प्रहासं कृत्वा]। किमुवाच ?—'यदि एषः ते सर्गः, शस्त्रं गृहाण' [यदि अश्वस्य बलात् नयनमेव ते निश्चयः, तर्हि शस्त्रं गृहाण]। शस्त्रेण किं भविष्यति ?—'भवान् खलु रघुम् अनिर्जित्य न कृती' [रघुं समरे विजित्य एव भवता अश्वो नेयः ; यावत् रघुः न जितः तावत् त्वम् आत्मानं कृतार्थं मा मन्यस्व]।

Prose order.—ततः (तदनन्तरं) तुरगस्य (अश्वस्य) रक्षिता (रक्षकः) प्रहस्य(प्रहासं कृत्वा) अपभयः (अभीतः सन्) पुनः (भूयः) पुरन्दरं (इन्द्रं) बभाषे (उवाच)—यदि एषः ते (तव) सर्गः (निश्चयः) शस्त्रं (अ[illegible] न (खलु) भवान् (त्वं) रघुम् अनिर्जित्य (अपराभूय)

2. करिष्यमाणः—कृ + स्य: स्यानि शानच् = करिष्यमाणः । Qualifies सः । कर्त्तभिप्राये क्रियाफले चात्मनेपदम् ; he wanted to put an arrow to the bow *for his own use.*

3. सशरम्—शरेण सह वियमानम् सशरम् , तम् । Qualifies शरासनम् ।

4. शरासनम्—शरा: अस्यन्ते क्षिप्यन्ते अनेन इति शर + अस + ल्युट् करणे = शरासनम् धनु : तम् ।

5. अतिष्ठत्—Remained स्था + लङ् द [conj I.73] ।

6. आलीढविशेषशोभिना—विशेषेण अतिशयेन शोभितुं शीलमस्य इति विशेष + शुभ + णिनि = विशेषशोभिन् showing to particular advantage. आलीढ is the name of a position in archery. Mallinatha quotes a lexicon to the following effect.—There are five positions in archery (1) वैशाख when the feet are separated side-ways by three *Bitastis* —about 24 inches; (2) मण्डल when the feet are so placed that the part of the body below the waist, together with the legs, gives the appearance of a gateway ; (3) समपद when the feet are in their natural position . (4) आलीढ when the right foot is thrown forward and the left bent back . (5) प्रत्यालीढ the reverse of आलीढ । आलीढेन विशेषशोभि आलीढविशेषशोभि,तस्मिन् ; तेन । Qualifies वपुःप्रकर्षेण ।

7. वपुःप्रकर्षेण—प्रकर्षः excellence : वपुषः प्रकर्षः वपुःप्रकर्षः ; तेन ; देहतुङ्गत्वेन *Mallinatha* has देहोन्नत्येन . But this is contradicted by the qualifying epithet आलीढविशेषशोभिना . For आलीढ requires separation of the feet and bending of one of them. Hence this will not improve the height In fact one will look shorter in such a position. I have thought it therefore better to take प्रकर्ष in its general sense *excellence*, which, when applied to the body of man, means development due to health and exercise. Also, it is evident that excellence in this sense might appear to advantage by position. Witness the trained wrestler when in position to receive his adversary. Every muscle is then seen to advantage owing to the position taken up. Raghu in that attitude showed superhuman development of muscles, and was comparable to S'iva himself.

was only *about to* fit an arrow to his bow [सन्धास्यन् in the future, not even कुर्वाणः], while Indra not only fitted an arrow, but even took aim with it (सन्धाय) and struck Raghu, as will be seen in the next S'loka. The epithet कर्मदः supplies the reason for this hastiness.

दिलीपसूनोः स बृहद्भुजान्तरं प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् ॥ ५४ ॥

Anvayabodhini — [illegible]

Prose order — [illegible]

Sanjivani — [illegible] ॥ ५४ ॥

[illegible] ॥ ५४ ॥

That arrow, used to the blood of great Asuras, having entered the broad chest of Dilipa's son, with curiosity as it were, drank human blood untasted before. (54)

अर्थेन तमग्निं मेघो न निर्वापयितुं शक्नोति ; तद्वत् इन्द्रोऽपि तस्मादेव निर्गतं तेजः-स्वरूपं निर्वापयितुं न शशाक इति दृष्टान्तः]।

Prose order.—वासवः (इन्द्रः) अतिप्रबन्धप्रहितास्त्रवृष्टिभिः (अनवरतनिक्षिप्तास्त्रवर्षैः) दुष्प्रसहस्य (असह्यस्य) तेजसः (प्रतापस्य) आश्रयम् (आधारं) तम् अम्बुदः (मेघः) अद्भिः (जलैः) स्वतः (निजकायात्) च्युतं (निर्गतं) वह्निम् (अग्निम्) इव निर्वापयितुं (शमयितुं) न शशाक (अशक्नोत्)।

Sanjivani.—अतीति। 'अतिप्रबन्धेन' अतिसातत्येन 'प्रहिताभिः' प्रयुक्ताभिः 'अस्त्रवृष्टिभिः दुष्प्रसहस्य' दुःखेन प्रसह्यते इति दुष्प्रसहं, तस्य दुःखेनाप्यसह्यस्य इत्यर्थः 'तेजसः' प्रतापस्य 'आश्रयं तं' रघुम् 'अम्बुदः' अद्भिः स्वतः च्युतं निर्गतं वह्निम् इव निर्वापयितुं न शशाक। रघोरपि लोकपालात्मकस्य इन्द्रांशसम्भवत्वादिति भावः ॥५८॥

মেঘ যেমন জলদ্বারা নিজ হইতে নির্গত বিদ্যুদগ্নির নির্বাপণ করিতে সক্ষম হয় না, সেই-রূপ ইন্দ্রও দুঃসহ তেজের আধার সেই রঘুকে অবিশ্রান্ত নিক্ষিপ্ত অস্ত্রবর্ষণ দ্বারা নিরস্ত করিতে পারিলেন না। ৫৮।

As a cloud cannot extinguish with water the fire which flows from itself so Vásava (Indra) with showers of missiles sent down in a very quick succession could not extinguish that receptacle of resistless energy. (58).

Miscellaneous Notes.

1. अतिप्रबन्धप्रहितास्त्रवृष्टिभिः—प्रकृष्टो बन्धः प्रबन्धः सातत्यम् Succession अतिशयितः प्रबन्धः अतिप्रबन्धः प्रादिसमासः ; अतिप्रबन्धेन प्रहिताः अतिप्रबन्धप्रहिताः—sent in uninterrupted succession. वर्षति सा इति वृष्+क्तिन् कर्तरि = वृष्टिः shower : अस्त्राणि एव वृष्टयः अस्त्रवृष्टयः ; अतिप्रबन्धप्रहिताः अस्त्रवृष्टयः अतिप्रबन्धप्रहितास्त्रवृष्टयः ; ताभिः। तृतीया करणे। With showers of missiles sent in uninterrupted succession.

2. दुष्प्रसहस्य—दुर्+प्र+सह्+खल् कर्मणि = दुष्प्रसहम् See Sanj. [illegible] सह। Qualifies तेजसः।

3. शशाक—शक्लृ शक्तौ : शक्+लिट् अ [लट् शक्नोति—शक्नुतः—शक्नुवन्ति, लोट् शक्नोतु—शक्नुताम्—शक्नुवन्तु, लङ् अशक्नोत्—अशक्नुताम्—अशक्नुवन्, विधिलिङ् शक्नुयात्—शक्नुयाताम्—शक्नुयुः, लिट् शशाक—शेके, लुङ् अशकत्—अशकन्]।

4. निर्वापयितुम्—निर्+वा+णिच्+तुम् = निर्वापयितुम् to extinguish.

5. वासवः—वसुरेव इति वसु+अण् स्वार्थे the word वसु being of the

प्रज्ञादि class. The commentators of Amara give three derivations of वासव: ; (1) वसूनि रत्नानि सन्त्य अस्य सन्ति इति ; (2) वसोरपत्यम् इति ; (3) वासं दैत्यानां वाति इति।

6. स्वत:—पञ्चम्यास्तसिल्। 'ध्रुवमपायेऽपादानम्' इति अपादाने पञ्चमी।

7. स्वत: च्युत वह्निम्—The fire issued from himself *i. e.* lightning. This may be said of Raghu also ; for Raghu having sprung from the energy of the Lokapálas, may be said to have issued from Indra.

N. B. Our poet believes that clouds contain electric fire. The last line is to this effect ; but he is more explicit in the *Meghadúta* where he remarks—'धूमज्योति:सलिलमरुतां सन्निपात: क्व मेघ'—where is a cloud which is but a combination of vapour, fire, water, and air ?

8. अम्बुद:—अम्बु जलं ददाति इति अम्बु + दा + क कर्त्तरि = अम्बुद: इत्य।

9. *Change of voice.*—...वासवेन...अम्बुदेन...ग्रेके।

ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमानार्णवधीरनादिनीम्।
रघुः शशाङ्कार्धमुखेन पत्रिणा शरासनज्यामलुनाद्बिडौजसः ॥६१॥

Anvayabodhini. - 'इन्द्रेण रघुर्न पराजित:, नापि देवो रघुणा ; ततश्च तुल्यबलौ तो अभूताम्—'तत: रघ: बिडौजस: शरासनज्याम् अलुनात्' [इन्द्रो हि एव रघुणा, यत् ततश्चानेव रघुस्तस्य धनुर्गुणं चिच्छेद]। केन चिच्छेद ?—'शशाङ्कार्धमुखेन पत्रिणा' [चन्द्रखण्डमिव कर्त्तने समर्थं मुखमग्रभागो यस्य बाणस्य ; तेन बाणेन स धनुर्गुणं चिच्छेद]। धनुर्गुणमात्र तेन छिन्नं, तदेव कथं भवता बहु मन्यते ?—'प्रमथ्यमानार्णवधीरनादिनीं (शरासनज्याम् अलुनात)' [मायं प्राकृतो गुण: ; तस्य तु सदाभीम उत्थितो भैरवो रव: मन्थनादुत्थितं समुद्रस्य घोरं रवम् अनुचकार]। किं तेन रवेणैव भवान् समुद्रमन्थनस्य स्मारित: ?—'हरिचन्दनाङ्किते प्रकोष्ठे (प्रमथ्यमानार्णवधीरनादिनीम्)' [मुहुर्मुहुराकृष्य मुच्यमाना सा ज्या प्रकोष्ठे नदन्ती एव आसीत् ; तत्रैव प्रकोष्ठे इन्द्रस्य हरिचन्दनरेखाऽपि राजते स्म ; मन्थनादेव रव:, मन्थनात् प्राप्तञ्च हरिचन्दनम्, एतदुभयोर्युगपत् एकत्र लाभात् समुद्रमन्थनमेव मे मनसि आयातम्]।

Prose order.—तत: (तदनन्तरं) रघु: हरिचन्दनाङ्किते (देवचन्दनचर्चिते)

प्रकोष्ठे (मणिबन्धकूर्परान्तराले) प्रमथ्यमानार्णवधीरनादिनीं (सागरमन्थनमन्द्रनिनादां) बिडौजसः (इन्द्रस्य) शरासनज्यां (धनुर्मौर्वीं) शशाङ्कार्धमुखेन (चन्द्रखण्डफलकेन) पत्रिणा (बाणेन) अलुनात् (चिच्छेद)।

Sanjivani—ततः इति। 'ततः रघुः हरिचन्दनाङ्किते प्रकोष्ठे' मणिबन्धे "प्रमथ्यमानार्णवधीरनादिनीं" प्रमथ्यमानार्णवः इव धीरं गम्भीरं नदतीति तां तथोक्तां, वेवेष्टि व्याप्नोतीति विट् व्यापकम् ओजः यस्य सः, तस्य 'बिडौजसः' इन्द्रस्य [पृषोदरादित्वात् साधुः] 'शरासनज्यां' धनुर्मौर्वीं 'शशाङ्कस्य अर्धं' खण्डः इव 'मुखं' फलं यस्य तेन 'पत्रिणा अलुनात्' अच्छिनत् ॥ ५९ ॥

অনন্তর রঘু ইন্দ্রের হরিচন্দনাঙ্কিত প্রকোষ্ঠে, মন্থন কালে সাগর-গর্জ্জনের ন্যায় গম্ভীরনাদী ধনুর্গুণ অর্দ্ধচন্দ্রবাণে ছেদন করিলেন ॥ ৫৯ ॥

Then Raghu, with an arrow the point of which was like a lunar segment, cut Vidoujas's (Indra's) bow-string deeply twanging like the sea when churned, on his forearm marked by the divine sandal paste. (59).

Miscellaneous Notes.

1. प्रकोष्ठे—In the *forearm*. *Mallinátha* has मणिबन्धे in the *wrist*. But when a bow is grasped for shooting, the *wrist* is in the *bow*, and the *string of the bow* is at about the middle of the forearm. Hence *Mallinátha's* meaning is untenable. प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च' इति मेदिनी—प्रकोष्ठ is the interval between the elbow and wrist.

2. हरिचन्दनाङ्किते—हरेः इन्द्रस्य चन्दनं हरिचन्दनम्। This divine Sandal tree was obtained from the ocean by churning. Sandal paste is applied to the inside of the forearms to allay the irritation caused by friction of the bow-string, हरिचन्दनेन अङ्कितः हरिचन्दनाङ्कितः; तस्मिन्। Qualifies प्रकोष्ठे।

3. प्रमथ्यमानार्णवधीरनादिनीम्—अर्णः जलम् अस्ति अस्मिन् इति अर्णवः by the *Várttika* 'अर्णसो लोपश्च'—अर्णस् takes व (मत्वर्थे) and drops the final स; प्र+मन्थ+शानच् कर्मणि = प्रमथ्यमानः प्रकामं मथ्यमानः being churned. प्रमथ्यमानः अर्णवः प्रमथ्यमानार्णवः; प्रमथ्यमानार्णव इव धीरं नदति इति प्रमथ्यमानार्णव+धीर+नद+णिनि = प्रमथ्यमानार्णवधीरनादिनी—*Mallinátha*. But with this वाक्य the 1st portion, प्रमथ्यमानार्णव, does n

become an उपपद, so it cannot be compounded. We therefore proceed as follows :— (1) धीरं नदितुं शीलमस्याः इति धीर+नद+णिनि [illegible] नाम्नीत्वे—धीरनादिनी, प्रमथ्यमानार्णव इव धीरनादिनी प्रमथ्यमानार्णवधीर[illegible] [illegible] 'उपमानानि सामान्यवचनैः' इति समासः। Or (2) धीरो नादः धीर[illegible] नादः ; प्रमथ्यमानार्णवस्य धीरनादः प्रमथ्यमानार्णवधीरनादः। सः अस्ति अस्या[illegible] इति प्रमथ्यमानार्णवधीरनाद। इति विग्रहः—प्रमथ्यमानार्णवधीरनादिनी, [illegible]

Qualifies शरासनज्याम्

4. शशाङ्कार्धमुखेन [illegible] शशाङ्कस्य अर्ध [illegible] शशाङ्कः a [illegible] of the moon. शशाङ्कस्य अर्धं [illegible] शशाङ्कार्धं a *segment* of the moon, *not* the semi moon, अर्ध here does not mean *half*. For then, by the rule 'अर्धं नपुंसकम्' the neuter अर्ध, meaning *half*, is placed first in a षष्ठीतत्पुरुष we should have got अर्धशशाङ्कः। शशाङ्कार्ध [illegible] मुखमस्य इति शशाङ्कार्धमुखः *Mallinātha*, or शशाङ्कार्धं, अर्धचन्द्र [illegible] मीदृक्फलक, मुखमस्य इति शशाङ्कार्धमुखः, तेन। Qualifies पत्रिणा।

5. शरासनज्याम्—शरा अस्यन्ते अनेन इति शर+अस+ल्युट् करणे=श[illegible] सनः शरासनस्य ज्या गुणः शरासनज्या, ताम्।

6. अलुनात्—अच्छिनत्, cut through लू+लङ् द [लट् लुनाति—लुनी[illegible] लोट् लुनातु—लुनीताम्, लङ् अलुनात्—अलुनीत, विधिलिङ् लुनीयात्—लुनी[illegible] लिट् लुलाव—लुलुवे, लुङ् अलावीत—अलविष्ट]।

7. विडौजस—विडति भिनत्ति इति विड भेदने+क कर्तरि विडम्; [illegible] भेदकम् ओजः तेजः अस्य इति विडौजाः इन्द्रः। This is Bhanuji Dikshit's derivation. In this derivation is not necessary to suppose any irregularity and class the word among the पृषोदरादिगण। तस्य, षष्ठी।

8. *Change of voice.*—रघुणा...प्रमथ्यमानार्णवधीरनादिनी...शरास[illegible] अलूयत।

[illegible] चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विष[illegible]
महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ॥६[illegible]

Anvayabodhini—इन्द्रेण कथं प्रतिकृतमेतत् ?—'सः चापम् उ[illegible] स्फुरत्प्रभामण्डलम् अस्त्रम् आददे' [स छिन्नगुणं तत् धनुः परित्यज्य प्रभाभिः [illegible]

अस्त्रं जग्राह]। किंभूतकं तदस्त्रम् ?—'महीध्रपक्षव्यपरोपणोचितम्' [येन अस्त्रेण पर्वतानां पक्षान् अपातयत, तदेव स तदानीं प्रयोगार्थं जग्राह]। कथं भूतः, ख्याते च, स इन्द्रः विवृद्धमत्सरः ?—'प्रबलस्य विद्विषः प्रणाशनाय' [यतोऽपि रघुः तेजसा इन्द्रतोऽपि अधिक आसीत ; तत् प्रबलस्य तस्य नाशार्थं इन्द्रेण तत् प्रयोक्तव्यं तेन]। पुनः कीदृशविशेषण दैवेन—'विवृद्धमत्सरः (स अस्त्रम् आददे)' [युद्धविच्छेदनात् तस्य कोपः पूर्वतोऽपि वृद्धः, तत यदपि विवृद्धमत्सर इव स तदस्त्रं जग्राह]।

Prose order.—विवृद्धमत्सरः (प्रवृद्धकोपः) सः चापं (धनुः) उत्सृज्य (त्यक्त्वा) प्रबलस्य (बलवतः) विद्विषः (शत्रोः) प्रणाशनाय (वधाय) महीध्रपक्षव्यपरोपणोचितं (पर्वतपक्षपातनपटुम्) स्फुरत्प्रभामण्डलम् (दीप्तिमण्डलपरिवेष्टितम्) अस्त्रम् (आयुधम्) आददे (जग्राह)।

Sanjivani—स इति। 'विवृद्धमत्सरः' प्रवृद्धवैरः 'सः' इन्द्रः 'चापम् उत्सृज्य प्रबलस्य विद्विषः' शत्रोः 'प्रणाशनाय' वधाय महीं धारयन्तीति 'महीध्राः' पर्वताः [मूलविभुजादित्वात् कप्रत्ययः]। तेषां 'पक्षव्यपरोपणे' छेदने 'उचितं स्फुरत्प्रभामण्डलम् अस्त्रं' वज्रायुधम् 'आददे' जग्राह ॥ ६० ॥

তখন তিনি মহাক্রোধে ধনুক পরিত্যাগ করিয়া, প্রবল শত্রুর বিনাশ মানসে পর্বতপক্ষচ্ছেদনে অভ্যস্ত প্রভামণ্ডলশোভিত অস্ত্র গ্রহণ করিলেন। ৬০।

He, greatly incensed having discarded the bow, took up the weapon with glittering orbs of light and practised in lopping off the wings of mountains, altogether to destroy the powerful enemy. (60

Miscellaneous Notes

1. चापम्—धनुः, the wood only without the string.

2. उत्सृज्य—त्यक्त्वा ; उत्—सृज्—ल्यप् = उत्सृज्य

3. विवृद्धमत्सर —क्रुद्धः कोपः ; 'मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि' इति मेदिनी। विवृद्धः मत्सरः क्रोधः यस्य, सः Greatly incensed. Qualifies सः which refers to विडौजाः of Sl. 59.

4. प्रणाशनाय—प्रणाशनं वधः, प्र—नश्—णिच्—ल्युट् भावे = प्रणाशनम् ; तस्मै। 'तुमर्थाच्च भाववचनात्' इति चतुर्थी : ल्युट् is here भाववचन, and the meaning is रघुं प्रणाशयितुम् आददे, *i. e.* there is तुमुन् implied ; hence the rule applies.

5. प्रबलस्य—प्रकृष्टं बलम् यस्य इति प्रबलः ; तस्य। Qualifies विद्विषः।

[illegible] ... Again in [illegible] ... the interval of [illegible] is between two actions, *falling down* and *getting up*. [illegible]

[illegible] is an alternative form.

6\. [illegible] Having [illegible]

7\. [illegible]

[illegible] Accusative of [illegible]

8\. [illegible] got up [illegible]

9\. [illegible]

[illegible]

10\. *Change of voice* [illegible]

तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः ।
तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ॥६२॥

Anvayabodhini [illegible] ... 'वृत्रहा अस्य वीर्यातिशयेन तुतोष' [illegible] ... 'तथापि शस्त्रव्यवहार[illegible] विपक्षभावे चिरं तस्थुषः' [illegible] ... शस्त्राणां प्रयोगेण निष्ठुरे विपक्षभावे [illegible] ... आसन् अपि [illegible] ... सत्यातिशयात् अथ सन्तोषः ?—'हि गुणैः सर्वत्र पदं निधीयते' [गुणा हि [illegible] प्रसरन्ति, शत्रोरपि हृदयम् आर्द्रीकुर्वन्ति]।

Prose order.— तथा (तावत्) अपि शस्त्रव्यवहारनिष्ठुरे (आयुधव्यापारक्रूरे) विपक्षभावे (शात्रवे) चिरं (बहुक्षणं) तस्थुषः (स्थितवतः) अस्य वीर्यातिशयेन (प्रभावप्रकर्षेण) वृत्रहा (वृत्रनाशनः इन्द्रः) तुतोष (ससन्तोष)। हि (यतः) गुणैः (उत्कर्षैः) सर्वत्र (सर्वस्मिन्) पदं (अधिकारं, प्रतिष्ठां) निधीयते (स्थाप्यते)।

Sanjivani.—तथापीति । 'तथापि' तथापतेऽपि 'शस्त्राणाम्' आयुधानां 'व्यवहारेण' व्यापारेण 'निष्ठुरे' क्रूरे 'विपक्षभावे' शात्रवे 'चिरं तस्थुषः' स्थितस्य 'अस्य' रघोः 'वीर्यातिशयेन' वृत्रं हतवान् इति 'वृत्रहा' ["ब्रह्मभ्रूणवृत्रेषु क्विप्"] 'तुतोष'। [स्वयं वीर एव वीरं जानाति इति भावः] कथं शत्रोः सन्तोषोऽत आह

8. पदम्—*step*—*Mallinátha* ; or *impression* उक्तं कर्मणि प्रथमा
9. निधीयते --नि + धा + लट् ते कर्मणि [conj. II. 43].
10. पदं हि सर्वत्र गुणैर्निधीयते—Excellence steps in everywhere (*Mallinátha*) ; or—Excellence makes impression everywhere. A familiar quotation. Bhavabhúti has a parallel line—

'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।'

11. *Change of voice.*— ..गुणाः निदधति।

असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम्।
अवेहि मां प्रीतमृते तुरङ्गमात् किमिच्छसीति स्फुटमाह वासवः॥

Anvayabodhini.—तुष्टेन तेन किं कृतम् ?—'वासवः स्फुटम् आह' [वासवः स्पष्टमुवाच]। किमुवाच सः ?—'मां प्रीतम् अवेहि, तुरङ्गमात् ऋते किम् इच्छसि ? इति' ["अहं तुभ्यं प्रीतः अस्मि, अश्वं विना अपरं यदेव इच्छसि तदेव ते दास्यामि" इति स उवाच]। किं ते प्रीतेः कारणम् ?—'मे आयुधं त्वदन्येन न विसोढम्' [त्वयैव एकेन मे एतत् वज्रास्त्रं सोढम्, अपरः कोऽपि एतत् सोढुं न शक्तः, अतस्ते वीर्यं दृष्ट्वा अहं प्रीतः अस्मि]। किम्भूतम् आयुधम् ?—'सारवत्तया अद्रिषु अपि असङ्गम्' [वीर्याधिक्यात् इदं मे आयुधं पर्वतान् अपि निर्भिद्य गच्छति, त्वया तु सोढम्, इति त्वयि मे प्रीतिर्जाता]।

Prose order.—सारवत्तया (वीर्याधिक्यात) अद्रिषु (पर्वतेषु) अपि असङ्गं (अप्रतिबन्धं) मे आयुधं (शस्त्र) त्वदन्येन (भवदितरेण) न विसोढं (विषेढं)। मां प्रीतं (तुष्टम्) अवेहि (जानीहि)। तुरङ्गमात् (अश्वात्) ऋते (विना) किम् इच्छसि (प्रार्थयसे) इति (एतत्) स्फुटं (स्पष्टम्) वासवः (इन्द्रः) आह।

Sanjivani.—असङ्गमिति। 'सारवत्तया अद्रिषु अपि असङ्गम्' अप्रतिबन्धं 'मे आयुधं' वज्रं 'त्वदन्येन न विसोढम्' अतः 'मां प्रीतं' सन्तुष्टम् 'अवेहि, तुरङ्गमात् ऋते' तुरङ्गं वर्जयित्वा ["अन्यारादितरर्ते—" इति पञ्चमी] 'किम् इच्छसि इति स्फुटं वासवः आह' ; तुरङ्गमात् अन्यददेयं नास्ति इति भावः॥ ६३॥

ইন্দ্র স্পষ্টই বলিলেন—দৃঢ়তার পর্ব্বতেও অপ্রতিহতগতি আমার এই অস্ত্র তুমি ভিন্ন অন্য কেহ সহ্য করিতে পারে নাই ; আমি তুষ্ট হইলাম জানিবে ; এই অশ্ব ভিন্ন তুমি কি প্রার্থনা কর ? ॥ ৬৩ ॥

My weapon, not-sticking [*Or*—unobstructed] even in mountains by reason of its potency, could be borne [*Or*—withstood] by no

one except you : know me pleased ; what do you want except the horse ?—thus said Vásava (Indra) plainly. (63).

Miscellaneous Notes.

1. असङ्गम्—सञ्ज + घञ् भावे = सङ्गः आसक्तिः sticking ; अविद्यमानः सङ्गः यस्य इति असङ्गम् not sticking. Qualifies आयुधम्। *Mallinátha* has अप्रतिबन्धम् unimpeded. No satisfactory meaning can be got out of असङ्ग। Of the various readings of this line (given in Nandargikar's edition) अभङ्ग is certainly the most preferable. अविद्यमानः भङ्गः पराभवः कुण्ठता वा यस्य तत् अभङ्गम्—not blunted or repulsed even against mountains. c. f. 'इन्द्रस्य वज्रः कुलिशं कुण्ठितानीव लक्ष्यते।' *Kumára.*

2. सारवत्तया – सार. अस्य अस्ति इति सार + मतुप् = सारवत् powerful ; तस्य भावः सारवत्ता power, potency ; तया। हेतौ तृतीया।

3. त्वदन्येन—त्वत्तः अन्यः त्वदन्यः – other than yourself, सुप्सुपेति समासः। Or this is uncompounded, त्वत् being in the fifth case singular.

4. विसोढम्—वि + सह + क्त कर्मणि = विसोढम् could be borne. Qualifies आयुधम्।

5. आयुधम्—आयुध्यते अनेन इति आ + युध + क करणे घञर्थे = आयुधम् by the Várttika 'घञर्थे कविधानं स्था स्ना पा व्यधि हनि युध्यर्थम्'।

6. स्फुटम्—Plainly क्रियाविशेषणम् qualifying आह। It is hardly clear what the significance of स्फुट is here.

7. आह—उवाच। ब्रू + लट् तिप् = ब्रू + णल = आह + णल् = आह। Now आह means ब्रवीति। It has never a past sense, and the use of it here for उवाच is ungrammatical, and impossible with a poet like Kálidása. *Vámana* says 'आह इति भूते अन्यदर्शनभ्रमात्'—Some bungling writers now and then use आह in the *past tense* mistaking it for an ordinary परोक्ष लिट्। He goes on "लिड्भ्रमाच्च एवं प्रयुङ्क्ते—'आहस्म स्मितमधुमधुराक्षरं गिरम्' इति"। It is surprising that *Kalidása*, who is admittedly the best of 'लिट्' writers, should in a single S'loka commit a grammatical blunder and also

use a word (स्फुटम्) which is very nearly superfluous. The mystery is at once cleared up on referring to the list of readings given in Nandargikar's edition. One of his manuscripts reads for the last line किमच्छमीति स्फुटमाह वासव: । Here किम is meaningless and is, I am almost sure, the work of the 'copyists devil' The true reading must have been स तम्। Restoring these readings the S'loka becomes—

अमङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरङ्गमात् किमिच्छसीति स्म तमाह वासव: ॥

This at once removes the superfluous word स्फुटम् and avoids *Vámana's* criticism. The last line now means इति वासव: तं रघुम् आह स्म · Or आह may be taken as an अव्यय in the sense of उवाच ।

8. *Change of voice.*— .. तदन्य: न विसोढवान्...अहं प्रीत: अवेहि... इष्यते (त्वया)...वासवेन ऊचे ।

ततो निषङ्गादसमग्रमुद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।
नरेन्द्रसूनु: प्रतिसंहरन्निषुं प्रियंवद: प्रत्यवदत् सुरेश्वरम् ॥६४॥

Anvayabodhini.—'तत: प्रियंवद: नरेन्द्रसूनु: सुरेश्वरं प्रत्यवदत्' [इन्द्रस्य तद्वचनं श्रुत्वा, प्रियवादी स राजसुतो रघु: सुरराजं प्रत्युक्तवान्] । किं कुर्वन्?—'इषुं प्रतिसंहरन्' [पुनरपि बाणप्रयोगम् अकुर्वन्] । किम्भूतम् इषुम्?—'निषङ्गात् असमग्रम् उद्धृतम् (इषुम्)' [यं बाणं स तदा उद्धरन् आसीत् ; तूणीरात् यो बाणः तदापि न सम्यक् उद्धृत:, तं बाणं प्रतिसंहरन् उवाच] । पुन: किम्भूतं बाणम्?—'सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् (इषुम्)' [मुखमस्य सुवर्णमयमासीत्, तस्य च दीप्त्या रघोरङ्गुलयो रञ्जिता बभूवु:] ।

Prose order. – तत: (तदनन्तर) निषङ्गात् (तूणीरात्) असमग्रम् (कियदंशं) उद्धृतम् (उत्कृष्ट)) सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिं (हेमाग्ररश्मिप्रतिदीपिताङ्गुलिं) इषुं (बाणं) प्रतिसंहरन् (नियमयन्) प्रियंवद: (मञ्जुवाक्) नरेन्द्रसूनु: (चक्रवर्तितनय:) सुरेश्वरं (देवराज) प्रत्यवदत् (प्रत्यभाषत) ।

Sanjivani.—तत इति । 'तत: निषङ्गात्' तूणीरात् 'असमग्रं' यथा तथा 'उद्धृतं सुवर्णपुङ्खद्युतिभि: रञ्जिता: अङ्गुलय:' येन तम् 'इषुं प्रतिसंहरन्' निवर्तयन्

["नाप्रहृतं प्रहरे"दिति निषेधात् इति भाव] प्रियं वदतीति 'प्रियंवदः' ["प्रियवशे वदः खच्" इति खच्प्रत्ययः "अरुर्द्विषदि"त्यादिना मुमागमः] "नरेन्द्रसूनुः" रघुः 'सुरेश्वरं प्रत्यवदत्' न तु प्राहरत इति भावः ॥ ६४ ॥

[illegible] ॥ ৬৪ ॥

Then the sweet-tongued son of the lord of men, while putting back an arrow not fully drawn out of the quiver and the glow of whose golden barb had painted the fingers, answered the lord of gods. (64).

Miscellaneous Notes.

1. निषङ्गात्—निषज्यते इत्यत्र इति नि + सञ्ज + घञ् अधिकरणे = निषङ्ग quiver तस्मात् [illegible]— इति अपादाने पञ्चमी.

2. असमग्रम्—Not fully न समग्रं यथा तथा असमग्रम्. [illegible]—; क्रियाविशेषणम् qualifying उद्धृतम्

3. उद्धृतम्—Extracted उत् + हृ + क्त कर्मणि = उद्धृतम् । Qualifies इषुम् ।

4. सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलम्—सुवर्णविकारः पुङ्खः सुवर्णपुङ्खः शाकपार्थिवादित्वात् [illegible], सुवर्णपुङ्खस्य द्युतिः सुवर्णपुङ्खद्युतिः [illegible] रञ्जिता. सुवर्णपुङ्खद्युतिरञ्जिता [illegible]—, सुवर्णपुङ्खस्य द्युत्या रञ्जिता अङ्गुलयः येन सः सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिः तम् Qualifies इषुम् Which had painted the fingers with the lustre of its golden shaft The efficiency of the arrow did not depend solely upon the metal, if it did, a steel shaft would certainly have been much better Each arrow had its own *mantra*, and it was the *mantra* that did the destructive work. Perhaps gold was needed for the efficacy of a certain class of *mantras* We generally find high class arrows described with golden shafts Thus,—

[illegible]

5. नरेन्द्रसूनुः—नरेन्द्रस्य दिलीपस्य सुत नरेन्द्रसूनुः रघु ।

6. प्रतिसंहरन्—Putting back प्रति + सम् + हृ + शतृ = प्रतिसंहरन् । Qualifies नरेन्द्रसूनु । The संहार of an arrow was not merely

thrusting it *back* into the quiver. This also required *mantra*. The *mantra* pronounced in the प्रयोग of an arrow gave it its own मूर्त्ति, and the counter-*mantra* (संहार) took away the मूर्त्ति. The arrow was then lifeless and again became an ordinary reed tipped with metal. Compare—'अशिथिलास्त्र इवतेव मवाप्' III. 37 ; 'संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम् ।' V. 57.

7\. प्रियंवदः—The speaker of pleasing words. See *Sanjivani*. Some read प्रियंवदम् qualifying सुरेश्वरम् । I prefer प्रियंवदः qualifying नरेन्द्रसूनुः । Because Raghu said just what Indra wanted, and therefore Raghu pleased Indra by what he said *i. e.* he was प्रियंवद to Indra. But what Indra had said, *i. e.* 'अतः गुरुतर किमिच्छसि' (Sl. 63) did not please Raghu ; for we shall presently see that he went back home *not much pleased* (तपस्य नातिप्रहृष्ट सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ।' (Sl. 67) ; so Indra was not प्रियंवद to रघु ।

8\. प्रत्यवदत—Replied to. प्रति + वद + लङ् द [लट् वदति—वदते, लोट् वदतु—वदताम्, लङ् अवदत्—अवदत, विधिलिङ् वदेत्—वदेत, लिट् उवाद—ऊदे, लुङ् अवादीत्—अवदिष्ट]

9\. सुरेश्वरम्—सुराणां देवानाम् ईश्वरः स्वामी सुरेश्वरः इन्द्रः । तम् ।

10\. *Change of voice.*—...प्रतिसंहरता प्रियम्वदेन नरेन्द्रसूनुना सुरेश्वरः प्रत्यौद्यत ।

अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यताम् ॥६६॥

Anvayabodhini.—'हे प्रभो ! सः मद्गुरुः क्रतोः अशेषेण फलेन युज्यताम्' [हे प्रभो ! स तथाभूतः मे पिता यज्ञस्य समग्रेण फलेन युक्तो भवतु, इत्थं मया प्रार्थ्यते]। सः किम्भूतः ?—'अजस्रदीक्षाप्रयतः' [नित्यदीक्षणार्थं धृतमतो मे पिता नित्यदीक्षायाः फलं लभताम्]। "अशेषेण" इति पुनः किमुच्यते ?—'विधिना एव कर्मणि समाप्ते (सति यत् फलम्, अशेषेण तेन फलेन युज्यताम्)' [वेदोक्तो यो विधिः, तेनैव कृते सति यागे यत् फलं लभ्यते, विधौ च्युतेऽपि तत्ता मे पितुः सदैव भवतु प्रमादात् भवतु] । कथमत्र त्वया विधिविपर्ययः आशङ्क्यते ?—'अश्वम् अमोच्यं मन्यसे यदि ततः' [अश्वस्य मोचने यदि सुतरामेव भवान् असमर्थः, तदा विधिवत् एव

6. विधिना—वेदोक्तेन विधानेन by proper means. करणे तृतीया।

7. कर्मणि—यज्ञे। भावे सप्तमी।

8. अजस्रदीक्षाप्रयतः—See note on अजस्रदीक्षाप्रयतस्य Sl. 44. This seems to imply that Dilípa made a vow not to cease sacrificing for a certain definite period of time.

9. मद्गुरुः—मम गुरुः, पिता मद्गुरुः, दिलीपः।

10. अशेषेण—अविद्यमानः शेषः परिशिष्टम् अस्य इति अशेषम् entire; तेन। Qualifies फलेन।

11. फलेन—सहार्थे तृतीया, फलेन सह युज्यताम्।

12. युज्यताम्—Let him join; युज+लोट् ताम् [लट् युज्यते, लङ् अयुज्यत, विधिलिङ् युज्येत, लिट् युयुजे, लुङ् अयुक्त]। This is after *Mallinátha*; but see Sl. 66, notes on च।

13. *Change of voice.*—...अत्र अमोघं मन्यते (त्वया)...अजस्रदीक्षाप्रयतेन तेन मद्गुरुणा...। See Sl. 66, notes on च।

14. *Remark.*—The prose order given by *Mallinátha* requires so many words to supply to make a sense out of it, that one can hardly suppose that it gives the correct meaning of the Sl'oka. I have suggested an alternative construction which (supposing समाप्ते विधिना = समाप्ते + अविधिना) I shall briefly explain. हे प्रभो यदि अग्रम् अमोघं मन्यसे, तर्हि अजस्रदीक्षाप्रयतः सः मद्गुरुः अविधिना (अश्वाभावात विधिलोपेन हेतुना) कर्मणि (यागे अकाले) समाप्ते (समाप्तिं गते) एव (समाप्तिचणे एव) क्रतोः अशेषेण (समग्रेण) फलेन युज्यताम् (अकाले अविधिना यागे समाप्तेऽपि फलाभावो माऽभूत् इत्यर्थः)। It should be remembered that the king took a vow of *unceasing* sacrifice for some time. But now the vow having come to an abrupt termination, owing to the loss of the horse, Raghu craves that his father might reap the full measure of the fruits of the *complete* sacrifice.

स वृत्तान्तमिमं सद्योगतस्त्रिलोचनैकांशतया दुरासदः।
सन्देशहराद्दिशाम्पतिः शृणोति लोकेश तथा विधीयताम्॥

Anvayabodhini.—किमपरमिच्छसि ?—'दिशांपतिः यथा इमं वृत्तान्तं

[illegible]

Prose order [illegible] *Mallinātha*.
The च seems better taken with [illegible] च (See note 2)

Sanjivani [illegible] ॥ ६६

[illegible]

And so arrange, O Lord of the universe, that the lord of men, now in the sacrificial room and unapproachable because of his having become a part of Trilochana Śiva, hears this incident from *your* messenger. 66

Miscellaneous Notes

1. यदा—Indeclinable तत्र प्रकारेऽर्थे ।

2. च—समुच्चय *Mallinātha* has शृणोति च : so he assumes समुच्चय of श्रवणक्रिया with another क्रिया But such other क्रिया is apparently not available. In the previous Sloka there is one क्रिया of विधेय mentioned by *Mallinātha* : it is दृश्यताम् which has a *future* sense. It should not be supposed, that शृणोति and दृश्यताम्, being in different tenses, cannot be predicated of the same person, at the same time, so समुच्चय is not possible. We

13. *Change of voice.*—[illegible]

तथेति कामं प्रतिशुश्रुवान् रघोर्यथागतं मातलिसारथिर्ययौ ।
नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ॥६७॥

Anvayabodhini.—[illegible]

Prose order.—[illegible]

Sanjivani.—[illegible]

[illegible]

The god who had Matali for charioteer, having promised Raghu's wish saying, "be it so"—went as he came. Sudakshina's son too, not very glad, returned to the king's sacrificial hall (67).

Miscellaneous Notes

अथ राज्याभिषेकः ।

तमभ्यनन्दत् प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः ।
परामृशन् हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् ॥६८॥

Anvayabodhini —अथ रघौ प्रत्यागते दिलीपेन किमनुष्ठितम् ?—'प्रजेश्वरः तम् अभ्यनन्दत्' [illegible] ।… 'हरेः शासनहारिणा प्रथमं प्रबोधितः' [illegible] । किं कुर्वन् अभ्यनन्दत् ?—'कुलिशव्रणाङ्कितं तदीयम् अङ्गं परामृशन्' [illegible] । … तमभ्यनन्दत्—'हर्षजडेन पाणिना परामृशन्' [illegible]]।

Prose order —हरेः (इन्द्रस्य) शासनहारिणा (वार्ताहरेण) प्रथमं (प्राक्) प्रबोधितः (ज्ञापितः) प्रजेश्वरः (दिलीपः) हर्षजडेन [illegible] पाणिना [illegible] कुलिशव्रणाङ्कितं [illegible] तदीयं (तस्य) अङ्गं (शरीरं) परामृशन् (स्पृशन् सन्) तम् अभ्यनन्दत् (प्रशंसितवान्)

Sanjivani – [illegible] 'हरेः' इन्द्रस्य 'शासनहारिणा' दूतेन 'प्रथमं प्रबोधितः' [illegible] 'प्रजेश्वरः' दिलीपः 'हर्षजडेन' [illegible] 'पाणिना' [illegible] 'तदीयम् अङ्गं' [illegible] 'परामृशन्' [illegible] 'अभ्यनन्दत्' ॥ ६८ ॥

[illegible]

वांसौ, प्रतिगृगुवांसः । प्रतिगृगुवांसम्, प्रतिगृगुवांसौ, प्रतिगृगुवुषः । प्रतिगृगुवुषा, प्रतिगृगुवद्भ्याम्, प्रतिगृगुवद्भिः । प्रतिगृगुवुषे, प्रतिगृगुवद्भ्याम्, प्रतिगृगुवद्भ्यः । प्रतिगृगुवुषः &c. । प्रतिगृगुवुषः, प्रतिगृगुवुषोः, प्रतिगृगुवुषाम् । प्रतिगृगुवुषि, प्रतिगृगुवुषोः, प्रतिगृगुवत्सु ।

4. रथं.—कर्मणि षष्ठी । रथं कामम् ।

5. यथागतम्—(यथा + आगतम्) । आ + गम् + क्त भावे = आगतम् आगमनम् ; आगतस्य योग्यम् यथागतम् ; अव्ययीभावः ; तत् यथा तथा । Adverb qualifying ययौ ।

6. मातलिसारथि.—मातलिः सारथिः यस्य सः । Refers to इन्द्र । This is a विशेषण only ; but there is no ambiguity as to who is meant. Compare—'निधानगर्भामिव सागराम्बराम्'

7. नृपस्य—राज्ञः दिलीपस्य । शेषे षष्ठी । नृपस्य सदोगृहम् ।

8. नातिप्रमनाः—प्रहृष्टं मनः यस्य इति प्रमनाः glad. अति अत्यन्तं प्रमनाः अतिप्रमनाः,सुप्सुपेति समासः, very glad. न अतिप्रमनाः नातिप्रमनाः, सुप्सुपेति समासः, not very glad. The last समास is not with नञ् but with the word न which is different from नञ्, but has the same meaning. If compounded with नञ्, the word would be अनतिप्रमनाः । Qualifies सुदक्षिणासूनुः ।

9. सदोगृहम्—सदसः यज्ञस्य गृहम् सदोगृहम् यज्ञागारम् ; तत् । सदस् in the sense of यज्ञ is seen in the word सदस्य । The poet uses it as accusative of न्यवर्त्तत । But *Mallinátha* supplies प्रति, and makes it कर्मप्रवचनीययुक्ते द्वितीया Our poet however frequently uses नि + वृत as सकर्मक । Compare—

> 'निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् ।
> समनुकम्प्य सपत्नपरिग्रहाननलकानलकानवमां पुरीम् ॥' Raghu IX.

Here again *Mallinátha* supplies प्रति ।

10. सुदक्षिणासूनुः—सुदक्षिणायाः सूनुः सुदक्षिणासूनुः, रघुः ।

11. न्यवर्त्तत—प्रत्याहृत्तः, came back नि + वृत + लङ् त [con. I. 62.]

12. *Change of voice.*—...मातलिसारथिना...प्रतिगृगुवुषा...रथं, सुदक्षिणासूनुना...नातिप्रमनसा (सता)...न्यवृत्यत ।

(एतत्प्रकारेण) महाक्रतूनां (महायज्ञानां) नवाधिकां (नवोत्तरां) नवतिम् आयुषः (जीवितस्य) क्षये (अवसाने सति) दिवं (स्वर्गं) समारुरुक्षुः (आरोढुमिच्छुः सन्) सोपानपरम्पराम् (सोपानपंक्तिम्) इव ततान (विस्तारयामास)।

Sanjivani.—इतीति। 'महनीयशासनः' पूजनीयाज्ञः 'क्षितीशः' इति' अनेन प्रकारेण ["इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु" इत्यमरः] 'महाक्रतूनाम्' अश्वमेधानां 'नवभिः अधिकां नवतिम्' एकोनशतम् 'आयुषः क्षये' सति 'दिवं' स्वर्गम् 'समारुरुक्षुः' आरोढुमिच्छुः 'सोपानानां परम्परा' पङ्क्तिम् 'इव ततान'॥ ६९॥

পূজনীয়-নিদেশ ভূপতি (দিলীপ) আয়ুর অবসানে স্বর্গারোহণে ইচ্ছুক হইয়া এই-রূপে সোপানশ্রেণীর ন্যায় নবাধিক নবতি মহাযজ্ঞ (শ্রেণী) বিস্তার করিলেন ॥৬৯॥

Thus, the lord of the earth whose command was respected by all, at the close of his life, wishing to ascend the heaven, completed nine over ninety of great sacrifices like a row of steps. (69)

Miscellaneous Notes.

1. इति—एवम् *i. e.* अनेन प्रकारेण। The आदि in the अमर quoted by *Mallinátha* means एवम्।

2. क्षितीशः—क्षितेः ईशः 'क्षितीशः'। This implies that having obtained mastery of the earth in this life, he was anxious to go to heaven for mastery there after death

3. नवाधिकाम्—नवभिः अधिका नवाधिका, [illegible] समासः, ताम्। Qualifies नवतिम्।

4. महाक्रतूनाम्—महान्तः क्रतवः इति, महाक्रतवः [illegible] तेषाम्। षष्ठी the relation being that of whole and part with नवतिः; नवतिम्। महाक्रतूनां नवाधिकां नवतिम्—ninety and nine of great sacrifices.

5. महनीयशासनः—शासनम् आज्ञा [illegible], महनीयं पूजनीयं शासनं यस्य सः, qualifies 'क्षितीशः'।

6. समारुरुक्षुः—With a wish to ascend. सम्+आ+रुह्+सन् = समारुरुक्ष; Now by the rule सनाद्यन्ता धातवः, the word समारुरुक्ष is a root, and hence takes all the कृत् affixes. Thus समारुरुक्ष+उ कर्तरि = समारुरुक्षुः। Qualifies क्षितीशः।

7. आयुषः—Of his life time. [illegible] 'क्षये' (क्षि+[illegible], [illegible])।

2. प्रथमम्—प्राक्। Before Raghu's return.

3. प्रबोधितः—ज्ञापितः ; प्र + बुध + णिच् + क्त कर्म्मणि।

4. प्रजेश्वरः—प्रजानाम् ईश्वरः स्वामी प्रजेश्वरः दिलीपः।

5. शासनहारिणा—शासनम् आज्ञां हर्त्तुं प्रापयितुं शीलमस्य इति शासन + हृ + णिनि कर्त्तरि = शासनहारी दूतः a messenger. तेन। अनुक्ते कर्त्तरि तृतीया।

6. हरेः—इन्द्रस्य। षष्ठी। हरेः शासनम् or हरेः शासनहारी।

7. परामृशन्—स्पृशन्। परा + मृश + शतृ = परामृशन्। Qualifies प्रजेश्वरः।

8. हर्षजड़ेन—हर्षेण जड़ निश्चलप्रायः हर्षजड़ः moving slowly with joy ; तेन। Qualifies पाणिना। *Mallinátha* has शिशिर for जड़। He means—motionless as if benumbed with cold. But जड़ is also seen in the sense of *listless* cf. 'चिन्ताजड़ं दर्शनम्'—*Sakuntala.*

9. कुलिशव्रणाङ्कितम्—कुलिशात्, कुलिशेन वा, व्रणः कुलिशव्रणः, षष्ठ्यन्तेति समासः कुलिशव्रणेन अङ्कितं चिह्नितं कुलिशव्रणाङ्कितम् marked by the wound made by the thunderbolt तत्। Qualifies अङ्गम्।

10. *Change of voice.*—...प्रबोधितेन प्रजेश्वरेण...परामृशता (सता) सः अभ्यनन्द्यत।

इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः।
समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरम्परामिव ॥६९॥

Anvayabodhini.—'इति क्षितीशः महाक्रतूनां नवाधिकां नवतिं ततान' [अनेन प्रकारेण स राजा नवाधिकनवतिसंख्यकान् अश्वमेधान् विदधे]। दुष्करमेतत्; तद्ब्रूहि किम्भूतः स राजा ?—'महनीयशासनः' [तस्य आज्ञा सर्वत्र पूज्या आसीत्; पृथिव्यां कोऽपि तस्य यज्ञं विहन्तुं समर्थो नासीत् ; अतस्तस्य नैतत्। चित्रम्' अद्य-प्रभृति अश्वं न अहरिष्यत्, मन्ये अजसमेव स अयक्ष्यत]। किम्भूतां नवतिं नवाधिकां ?—'सोपानपरम्पराम् इव' [सोपानानां श्रेणिमिव स क्रतूनां नवाधिकां नवतिं विदधे]। किमिच्छन् स क्रतुं सोपानं मेने ?—'आयुषः क्षये दिवं समारुरुक्षुः (सन्)' जीवितस्य अन्ते सति स्वर्गं गन्तुमिच्छुः स राजा सुखेन गमनार्थम् एकैकं क्रतुम् एकमेकं सोपानमिव ततान]।

Prose order.—महनीयशासनः (पूजनीयाज्ञः) क्षितीशः (महीक्षित्) इति

8. अये—चि अयें or गतौ + अच् भावे = अयः अत्ययः ; तस्मिन् . अते सप्तमी (*Mallinātha* or कालाधिकरणे सप्तमी।

9. ततान—अविच्छेदेन विदधे। तन + लिट् अ [conj. III. 25].

10. सोपानपरम्पराम्—सोपानानां परम्परा श्रेणी सोपानपरम्परा ; ताम्। परम्परा looks very much like पर repeated ; and its meaning, *succession*, countenances the idea. Wilson indeed derives it as such. But this seems to be an error. Bhattoji says—'परम्परा' शब्दस्तु अव्युत्पन्नं शब्दान्तर स्त्रीलिङ्गम्। So परम्परा has no derivation.

11. *Change of voice.*—...महनीयशासनेन चितीशेन......नयाधिकृतः...समारुरुक्षुणा (सता) सोपानपरम्परा...तेने।

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम्।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्॥ ७०॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
रघुराज्याभिषेको नाम तृतीयः सर्गः।

Anvayabodhini.—'अथ सः सूनवे यथाविधि सितातपवारणं दत्त्वा मुनिवनतरुच्छायां शिश्रिये' [अनन्तरं स वृद्धो राजा पुत्राय शास्त्रोक्तेन विधिना श्वेतच्छत्रं दत्त्वा, मुनिभिः सह अरण्यवासं स्वीचकार]। किमिदं सितातपवारणं नाम?—'नृपतिककुदम्' [एतदेव हि राजचिह्नम् ; पुत्राय राजा दत्त्वा स्वयं वनं जगाम]। किम्भूताय सूनवे?—'यूने' [यौवनावस्थां गताय सुताय राजा ददौ]। किम्भूतः सन् एवं चकार?—'विषयव्यावृत्तात्मा (सन्)' [इन्द्रियग्राह्येषु अर्थेषु वीतस्पृहः सन्; इक्ष्वाकवस्तु यौवने विषयैषिणः, वार्द्धके पुनर्मुनिवृत्तयः ; अतएव वृद्धः स युवानं पुत्रं विषयभोगे नियुज्य, स्वयं वनं गतः]। अथ सुदक्षिणा किमकरोत्?—'तया देव्या सह (स मुनिवनतरुच्छायां शिश्रिये)' [वनेऽपि सुदक्षिणा स्वामिनम् अनुगता]। अथ कथं न तौ गृहे स्थित्वा सुतस्य श्रिया सेव्यमानौ मुमुदाते?—'गलितवयसाम् इक्ष्वाकूणाम् इदं हि कुलव्रतम्' [उक्तमेव मया पूर्वं यत् इक्ष्वाकवः परिणते वयसि गृहिणो न भवन्ति, तादृशा महानुभावाः कथं कुलाचारं त्यजेयुः?]।

Prose order.—अथ (अनन्तरं) विषयव्यावृत्तात्मा (व्यावृत्तविषयाभिलाषः सः) यथाविधि (यथाशास्त्रं) यूने (तरुणाय) सूनवे (पुत्राय) नृपतिककुदं (राजचिह्नं) सितातपवारणं (श्वेतच्छत्रं) दत्त्वा (अर्पयित्वा) तया देव्या (महिष्या) सह (समं) मुनिवनतरुच्छायां (तपोवनपादपतलं) शिश्रिये (समाश्रयत्)। हि (यतः) गलितवयसां (वृद्धानां) इक्ष्वाकूणां (इक्ष्वाकुवंशीयानां) इदं (एतत्) कुलव्रतं (कुलाचारः)।

Sanjivani.—अथेति। 'अथ विषयेभ्यः व्यावृत्तात्मा' निवृत्तचित्तः 'सः' दिलीपः 'यथाविधि' यथाशास्त्रं 'यूने सूनवे नृपतिककुदं' राजचिह्नम् ["ककुदं ककुदे श्रेष्ठे वृषांसे राजलक्ष्मणि" इति विश्वः] 'सितातपवारणं' श्वेतच्छत्रं 'दत्त्वा तया देव्या' सुदक्षिणया 'सह मुनिवनतरुच्छायां शिश्रिये' शिश्राय वानप्रस्थाश्रमं स्वीकृतवान् इत्यर्थः। तथाहि 'गलितवयसां' वृद्धानाम् 'इक्ष्वाकूणाम्' इक्ष्वाकुवंशीयानाम् [तद्राजस्य बहुषु तेनैवास्त्रियाम् (अ॰ २) लुक्] 'इदं' वनगमनं 'कुलव्रतम्'। [हरिणी वृत्तमिदं ... । तदुक्तं वृत्तरत्नाकरे, "रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा" ...] ॥ ७० ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया
रघुवंशटीकायां सञ्जीविनीसमाख्यायां तृतीयः सर्गः ।

অনন্তর বিষয়-বৈরাগ্যবান্ দিলীপ যুবক পুত্রকে যথাবিধি রাজচিহ্ন শ্বেত-ছত্র প্রদান করিয়া সেই মহিষী (সুদক্ষিণার) সহিত মুনিগণের তপোবন-তরুতল আশ্রয় করিলেন। ... বৃদ্ধ ইক্ষ্বাকুবংশীয়দিগের ইহাই কুলব্রত ॥ ৭০ ॥

Then his heart drawn back from the world, he, having made over to his young son the white umbrella—the sign of royalty, resorted, with that queen of his, to the shade of a forest tree inhabited by ascetics. This indeed is the family custom of Ikshaku's descendants at the decline of life (70)

Miscellaneous Notes

अत्यसर्गविवक्षयां hence अकर्मक । Compare Panini's तेन निर्वृत्तम् for तेन निर्वर्तितम् ।

2. यथाविधि—विधेः अनतिक्रमः यथाविधिः, पदार्थानतिक्रमे अव्ययीभावः तत् यथा तथा--Adverb qualifying दत्त्वा

3. सूनवे—पुत्राय । चतुर्थी सम्प्रदाने ।

4. नृपतिककुदम्—नृणां पतिः नृपतिः ; नृपतेः ककुदं चिह्नं नृपतिककुदम् the emblem of royalty तत् । Though according to *Amar* and *Medini* ककुद may be both masculine and neuter ['प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्' इत्यमरः, 'ककुत् स्त्री ककुदोऽप्यस्त्री प्राधान्ये राड्ध्वजे वरे' इति मेदिनी], our poet seems to prefer it always in the neuter (क्लीबलिङ्ग) । Compare 'इक्ष्वाकुवंश्यः ककुदं नृपाणाम्' VI. 71 Qualifies सितातपवारणम् ।

5. सितातपवारणम्—आतपं रवितेजो वारयति अनेन इति आतप+वृ चुरादि+ल्युट् करणे=आतपवारण छत्रम् ; सितं शुभ्रम् आतपवारणं सितातपवारणम् ; तत् Accusative of दत्त्वा । Compare—'शशिप्रभं छत्रमुभे च चामरे' Sl. 16.

6. मुनिवनतरुच्छायाम्—मुनिसेवितं वनं मुनीनां वनं वा मुनिवनं, शाक-पार्थिवादिवत् कर्मधारयः षष्ठीतत्पुरुषो वा ; मुनिवनस्य तरुः मुनिवनतरुः ; मुनिवनतरोः छाया मुनिवनतरुच्छाया ; ताम् । Accusative of शिश्रिये । तरोः in the singular, and not तरूणाम् in the plural. With the plural (तरूणाम्) the compound will become मुनिवनतरुच्छायम् by the rule 'छाया बाहुल्ये'—छाया at the end of a compound will become neuter if the छाया of several trees is meant. Again, though मुनिवनतरुच्छायम् also preserves the metre, the poet is bound to write मुनिवनतरुच्छायम्, for anchorites have a fixed habitation under the shade of some *one* tree ; they do not change their abode from place to place like the nomads of modern times.

7. देव्या—महिष्या । 'सहयुक्ते अप्रधाने' इति तृतीया ।

8. तया—प्रसिद्धार्थत्वात् यच्छब्दोपादानं नापेक्षते ।

9. शिश्रिये—Resorted to. श्रि+लिट् ए [लट् श्रयति—श्रयते, लोट् श्रयतु—श्रयताम्, लङ् अश्रयत्—अश्रयत, विधिलिङ् श्रयेत्—श्रयेत, लिट् शिश्राय—शिश्रिये । लुङ् अशिश्रियत्—अशिश्रियत] । कर्त्रभिप्राये क्रियाफले आत्मनेपदम् ।

SUPPLEMENTAL NOTE ON THE METRES IN CANTO III

1. Sloka [illegible] inclusive are in the metre [illegible], (or as some call it [illegible]), defined as [illegible] The metre is called [illegible] if the *[illegible]* [illegible] follow in each *páda* in order. This gives the scheme

[illegible]

Thus

[illegible]

[illegible]

2. Sloka 70 is in the metre [illegible] *Mallinátha* does not define it. The [illegible] gives the definition '[illegible]' The metre is called [illegible] if the traids [illegible] followed by a *light*, and then a *heavy* syllable, appear in order in each *páda*. There should be in each páda *pause* (यति) after the first six letters, then after four more, and lastly after seven more. Hence the scheme is

⏑ ⏑ –, ⏑ ⏑ –, ‖ – –, ‖ – –, ⏑ ⏑ –, ⏑ – ‖

Thus

⏑ ⏑ ⏑ ⏑ ⏑ – – – – ⏑ – ⏑ ⏑ – ⏑ –

[illegible] ‖

END OF CANTO III.

Anvayabodhini.—कीदृशः तस्मिन् प्रजानाम् अनुरागः अभवत्—'स सर्वस्य हि लोकस्य मनः आददे' [सः एव रघुः तस्मिन् प्रीतिमान् आसीत्, यतः सर्वोऽपि तमभजत्]। किम्भूतः स एवं मनः आददे?—'नातिशीतोष्णः' [नातिमात्रं शीतः, न वा उष्णः अतिमात्रं अनुभूतः, स सर्वस्य मनः आददे]। नातिशीतोष्णतायां को हेतुः?—'युक्तदण्डतया (नातिशीतोष्णः)' [अपराधस्य मात्रया स दण्डमदापयत्, एवम् अपराधिनं प्रति तेन विहितो दण्डः कदापि अनुरूपो नाभवत्; अतः स सर्वस्य मनः आददे]। क इव?—'दक्षिणः नभस्वान् इव' [यथा मलयानिलः न शीतः नात्युष्णः सन् सर्वं प्रीणयति, तथा सोऽपि न मृदुः न चात्युग्रः सन् सर्वमतोषयत्; अतो मन्वादीन् विदुषः प्रजानुरञ्जकं वदन्ति च]।

Prose order.—सः युक्तदण्डतया (यथापराधदण्डत्वात् समुचितशासनत्वात्) नातिशीतोष्णः (अनतिमृदुकठोरः सन्) दक्षिणः (दक्षिणदिग्भवः) नभस्वान् (वायुः) इव सर्वस्य (सकलस्य) हि (एव) मनः (चित्तं) आददे (जहार)। *Mallinātha* does not give the prose order.

